ॐ

उपाकर्मविधिः

उद्यस्थनापोस्तास्तमितारितारानिकरस्याऽऽप्यायनमोपहारिणः स्व
प्रकाशाकाशितधर्माधाशोषदिशोभिः शोषमनीषिमानमाज्ञविका
सकस्थैर्यशौर्यौदार्यदयादिगुणगणभूषितवक्षसोऽनवार्थाभिधस्य
जम्मूकाश्मीराद्यधीशमहाराजश्रीप रणवीरसिंहाकेम्य

आज्ञया

श्रीनगरान्तर्यन्त्रालयेनदधिकारिसत्यव्रतरायदरस्वरूपेणयन्त्रितः ॥

CC-0 In Public Domain. Digitized by eGangotri

CC-0 In Public Domain. Digitzed by eGangotri

ॐ

उपाकर्मविधिः

उद्यत्प्रतापोस्तसमस्तमित्रारितारानिकरस्याऽन्यायतमोपहारिणः स्व
प्रकाशप्रकाशितधर्ममार्गाशेषदिशोनिः शेषमनीषिमाननमान्यविका
सकस्य धैर्यशौर्यौदार्यदयादिगुणगणाभूषितवक्षसोऽन्वर्थाभिधस्य

श्रीश्रीश्रीश्रीश्री रणवीरसिंहार्कस्य

आज्ञया

श्रीनगरान्तर्यन्त्रालयेन दयिकारिप्रभृत्तरायदत्तस्वावरायेणायन्त्रितः ॥

CC-0 In Public Domain. Digitzed by eGangotri

ॐ

श्रीगणेशाय नमः

ओं गणाधरपदद्वंद्वं नत्वा मंगलं च विधाय श्रीमन्महाराजाधिराज श्रीरणवीरसिंहभूपालस्याज्ञयाद्दी
क्षाकाश्मीरदेशस्थानां द्विजानां वेदोक्तधर्मपरिपालनार्थं यथावृद्धानुसारेण मया जनार्दनभट्टेन भा
स्करसूत्रानुसारेण स्नानविधृत्सर्जनऋषिपूजनतर्पणउपाकर्म च सम्यक् तन्त्रेण लिख्यते त
त्रोत्सर्गकालो निर्णीयते अत्र गृह्यसूत्रं पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्यायानुत्सृ
जेयुरुदकान्तं गत्वेति सूत्रार्थः पौषमासस्य रोहिणीनक्षत्रयुक्ते अथवा मध्यमाष्टकायां ।
पौषकृष्णाष्टम्यामध्यायानुत्सृजेयुराचार्यशिष्या उत्सृष्टानां छंदसां पुनरुपाकरणं यावत्तावन्न
पठेयुरित्यर्थः अत्र कालान्तरमप्युक्तं गृह्यकारेण तथाच सूत्रं अर्द्धषष्ठान्मासानधीत्योत्सृजे
युरर्द्धसप्तमान्वेति सूत्रार्थः अर्द्धषष्ठान्मासान् अर्द्धः षष्ठो मासो येषु तेऽर्द्धषष्ठास्तान् सार्द्धपञ्च ।
मासानिति यावत् श्रावणमुपाकृतानि छंदांसि माघकृष्णमावस्यापर्यन्तमधीत्योत्सृजेयुः अ
र्द्धसप्तमान्वा अर्द्धः सप्तमो मासो येषु तेऽर्द्धसप्तमास्तान् सार्द्धषण्मासानिति यावत् फाल्गुनकृ
ष्णामावास्यापर्यन्तमधीत्योत्सृजेयुरित्यर्थः तथाच सूत्रार्थकारिका पौषमासस्य रोहिण्यां कृ
ष्णाष्टम्यामथापि वा उदकान्ते समासाद्य वेदस्योत्सर्जनं बहिरिति दर्शान्ताभिप्रायेण पौषकृ ।

CC-0 In Public Domain. Digitzed by eGangotri

साष्टम्यां पौर्णमास्यं ताभिप्रायेण माघकृष्णाष्टम्यामित्यर्थः वेदस्येति वेदशब्देन मंत्रब्राह्मणयो
रेवोत्सर्गः नाङ्गानां छन्दोवत् सूत्राणीत्यादिना भेदावगमात् अत्र सूत्रोक्तकाले उत्सर्गाख्यक
र्मकर्तव्यमशक्तश्चेत् स्मृत्युक्तकालेपिकुर्वीत तत्रमनुः पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः
माघशुक्लस्यवाप्राप्ते पूर्वाह्णे प्रथमेहनि १ कात्यायनः उत्सर्गश्च तदातिष्ये कुर्यात्प्रोष्ठपदे था:
वा तद्भावादिरगृह्येविशेषः पुष्येत्सर्जनं कुर्यादुपाकर्मदिनेथवेति पुष्योऽथमासेइति
मदनरत्नकारेण व्याख्यातं उपाकर्मकालस्तु सूत्रकारेणोक्तः अथातोध्यायोपाकर्मौषधीनां प्राद
र्भावेश्रवणेनश्रावण्यां पौर्णमास्यांश्रावणस्यपञ्चमींहस्तेनवेति सूत्रार्थस्तु प्रयोगे स्फु
टीभविष्यति क्वचित्निषेधोप्युक्तः संक्रान्तौग्रहणेचैवसूतके मृतकेपिवा गणस्नानंनकुर्वीत
नारदस्यवचोयथा गणस्नानशब्देनोत्सर्गाख्यंकर्म अतएव स्मृत्यर्थसारे उक्तम् कस्मिंश्चि
द्दिने ग्रहणसंक्रान्तिवर्जिते कार्यं कर्मणेनलोपः नोत्कर्षइति इत्युत्सर्गकालंनिर्णीय यथा
विधिप्रयोगंकुर्वीत स्नानंच विधिवत्तत्रेत्युक्तत्वाद्यथाविधि स्नानप्रयोगोनिरूप्यते तत्रायंप्र
कारः अयंनित्यस्नानस्य कालापकर्षणविधिः नतु कर्माङ्गत्वेनविधानं ततश्चतस्मिन्दिने प्रा
तराह्निकं मध्याह्निकंस्नानंप्रातरेव कर्तव्यम् नमध्याह्ने दैवकर्मत्वात् प्रथमंसशिष्याचार्यैः प्र
थमप्रयोगे गणपतिपूजनपूर्वकं मातृकार्चनमाभ्युदयिकश्राद्धं यथोक्तं कुर्वीत श्राद्धं
तोरेव तथाचरेणुकदीक्षितः पौषमासस्यरोहिण्यांकृष्णाष्टम्यामथापिवा माघस्यायतिथौत

CC-0 In Public Domain. Digitzed by eGangotri

तत्पूर्वाह्णोपाकरणस्यवा उत्सर्गविधिवत्कुर्याज्जलान्ते छन्दसांबहिः नाङ्गानांमातृपूजादिश्राद्धं।
कुर्यादग्रजः सदेति शुक्ले वाससी परिधाय कृतकृशोपग्रहः **कृतप्राणायामोदक्षि॥**
णपाणिनागृहीत वारिकुशसमयवकुंकुमो देशकालौ संकीर्त्य उरस्य कंठ्य ता।
लव्य मूर्द्धन्य दन्त्य ओष्ठ्यनासिक्य कंठ्यनासिक्य तालव्यनासिक्य मूर्द्धन्यनासिक्य दन्त्यना
सिक्य ओष्ठ्यनासिक्य कंठ्यतालव्य कंठोष्ठ्य दन्तोष्ठ्य जिह्वामूलीयोपध्मानीय ह्रस्वदीर्घप्लु
त स्वरादिभिर्भावपरस्वर्णाविश्लिष्टानाम् छंदसामधीतानामध्यापितानांयातयामत्वनि।
हानिद्वाराश्रीपरमेश्वरप्रीत्यर्थं स्वाशिषोदकुत्सर्जनाख्यं कर्म करिष्ये तदंगत्वेन गणपतिपूज
नमातृकापूजननान्दीश्राद्धानि करिष्ये तत्सर्वं गणपत्यादिपूजनं यथोक्तविधिना॥
संपादयेत् ततः स्नानतर्पणपूजोपकरणानि मृदादीनि गृहीत्वा ग्रामात्प्रागुदग्वादि।
शि शिष्यैः सह नद्यादिरम्यं जलाशयं प्रतिगच्छेत् देवखातालाभे चतुरः पिण्डानुद्धृत्य परकी।
यजलाशये स्नानमाचरेदित्यपि बोद्धव्यं **ततस्तीरे स्थित्वा** शुद्धां मृदं शुष्कं गोमयं कु
शान् तिलानक्षतान् सुरभीणिपुष्पाणि दूर्वा अपामार्गं ऋषिस्थापनार्थं पीठं ऋषिपूजना
र्थं गंधं धूपार्थं सुगंधिद्रव्याणि घृतदीपः नानाविधनैवेद्यानि वर्षोद्भवानि फलानि पूगीफ
लानि यज्ञोपवीतानि पृथक्पृथक्स्थापयेत् प्रथमभागेन मृदा पाणिपादानुलेपनं ततः प्र
क्षालितपाणिपादः सपवित्रकरः **बद्धशिखकक्षशिरःस्थित** वामस्कन्धप्रलम्ब तत

CC-0 In Public Domain. Digitzed by eGangotri

स्थले जले चैकैकं पादं कृत्वोपविश्य वाहू जान्वन्तरा कृत्वा मुक्तां गुष्ठकनिष्ठिकेन दक्षिणहस्ते
न फेनबुद्बुदवर्जं स्वच्छं माषमज्जनपरिमितं जलमादाय गुष्ठमूलस्थब्राह्मेण तीर्थेन ब्राह्ममन्त्रा
वर्त्तिः पिबेत् इत्यस्य यानाभ्रेयः पादपर्यन्तानि **इदं विष्णुरिति** मेधातिथिऋषि विष्णुर्देव
गायत्री अङ्गलेपने। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा स्मार्त्तक
र्मणि कण्डिकान्तो मन्त्रः सर्वत्र तथाचरेत्तुः गृह्यकर्मसु ये मन्त्रा ज्ञेयास्त्वाध्याय पाठतः किञ्च
मध्याह्ने त्याज्येन कुर्यात विलम्बिता इति तडागादिषु तीर्थेषु सुप्रयं स्नानमाचरेदिति नद्यादौ तु
प्रवाहाभिमुखो वा स्नानमाचरेत् ॥ **तथा च नरसिंह पुराणे** ॥ तथा स्रा
वत्सु च स्नायात् प्रतिस्रोतः स्थितो द्विजः याया सस्रुङ्गामय्यस्नासु स्नानं तत्र यश्मादेव सर्वो
पिशाचिनः कार्यं विना वाजसनेयिनां इति विशेष वाक्यमङ्गानयो सूर्याभिमुखं स्नानं प्रोक्तं ततः
सूर्याभिमुखः स्थित्वा आपो अस्मानित्यादि देवी रित्यं तेन निमज्जेत् पिबेत् ततो गुष्ठमूलेन स्व
द्विः प्रमृज्याङ्गुष्ठमूलेन द्वाभ्यां खानि संस्पृशेत् तद्यथा तर्जनीमध्यमानामिकाभिरास्यं अङ्गु
ष्ठतर्जनीभ्यां नासारन्ध्रद्वयं आदौ दक्षिणं ततो वामं अनामिकाङ्गुष्ठाभ्यां चक्षुषी ताभ्यामेव श्रो
त्रे अङ्गुष्ठकनिष्ठिकाभ्यां नाभिं पाणितलेन हृदयं संकुचितकराग्रेण स्कन्धद्वयं एवं शीर्षं एवं स्ना
नं च मनं विधाय सङ्कल्पं कुर्वीत् देशकालौ संकीर्त्य अमुकगोत्रोऽहं कर्मणि स्नानविधिना स्नानं कुर्वे
अत्र प्रणवपूर्विका मन्त्राः पठनीयाः तदुक्तं दाल्भ्यपरिशिष्टे ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म।

CC-0 In Public Domain. Digitzed by eGangotri

णि अनेनैव त्वकृतं सर्वं ब्रह्मवेत्सिद्धिकारणं १ तत उरुंहीत्यस्य शुनःशेप ऋषिर्वरुणो देवता त्रिष्टुप्
जलाभिमंत्रणे विनियोगः ॐ उरुंहि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ अपदे पादा प्र
तिधातवेऽकरुतापवक्ता हृदयाविधश्चित् नमो वरुणायाभिष्ठितो वरुणस्य पाशः १ इति मन्त्रे
णानेन यमामन्त्रयेत् ततो येते शतमिति मंत्रस्य वामदेव ऋषिर्वरुणस्सविता विष्णुर्विश्वमरु
त्स्वर्का देवताः त्रिष्टुप् तोयावर्तने विनि॰ ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महा
न्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इति मंत्रेणानन्तरं दक्षिणहस्तेन दक्षिणा
वर्तमालोडयेत् ततः सुमित्रिया न इत्यनेन पूर्णाञ्जलिना तोयं गृहीत्वा दुर्मित्रियेत्यनेन यस्यां दिशि
द्वेष्योऽस्ति तस्यां दिशि द्वेष्यो विक्रमाद्युदकं त्वा द्वेष्यं मनसा विचिन्त्य तटेऽञ्जलिं प्रक्षिपेत् द्वेष्य अ
भावे काष्ठादीन्स्मृत्वाञ्जलिं प्रक्षिपेत् सुमित्रिया न इति मंत्रस्य प्रजापतिर्ऋषिः आपो देव॰ यज्ञ
र्गृहणे विनि॰ ॐ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियेत्यस्य प्रजापतिर्ऋषि आपो देव॰ यज्ञ
अञ्जलिप्रक्षेपे वि॰ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः अभिचारकेऽपि स्पृशेत् द्वि
तीयभागेन कट्यादीनामवलेपनं मृदं वामकरेणादायोत्तमाङ्गेन कटिमद्य लिप्याद्भिः प्रक्षाल्य
तथैव पुनर्द्विर्लेपनप्रक्षालने कुर्यात् तथैव वक्षसि करजङ्घे चरणौ करौ च मृदा प्रत्येकं त्रिस्त्रि
स्त्रिः प्रक्षाल्याचम्य तीर्थोदकाय नमः इति कायवाङ्मनोभिस्तीर्थोदकं नमस्कुर्यात् ततस्तृती
यभागेन मृदा इदं विष्णुरिति मन्त्रेण दक्षिणपाणि गृहीतया मृदा ललाटादिनाभिपर्यन्तानि।

CC-0 In Public Domain. Digitzed by eGangotri

गात्राणिप्रोक्षमेमहि **आपोअस्मानितिमंत्रस्य** प्रजापतिरृषिरापोदेवता अनुष्टुप्छंदः मज्ज
नोन्मज्जनेवि० ॐ आपोअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु विश्वं हि रिप्रं प्रवहन्ति
देवीः तत उदिदाभ्यऽइत्यादि पूतएमीत्यंते नोन्मज्जेत् ॐ उदिदाभ्यः शुचिरापूतऽएमि पुनस्त्वा
स्नी निमज्योन्मज्याचमेत् ततः पाणिभ्यां गोमयमादाय पूर्वं मृल्लेपनवल्ललाटादिपादतलप
र्यन्ताङ्गान्यनुलिम्पेत् **मानस्तोक** इति मंत्रस्य कुत्सऋषिः रुद्रोदेवता जगतीछंदः अ
ङ्गानुलेपने विनियोगः ॐ मानस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः मा नो
वीरान्रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे **उदकेस्नायात्** ततोगोमयलिप्तम
ववदमाणोरष्टभिर्मंत्रैः इतिमंत्र कुंभमुद्दयादत्तिलाञ्जलकेनवाधीरोभिषिंचेत् दत्तांगुष्ठपर्वा
ग्रहेतिह्वाहस्तद्वयेनतु सावकाशामेकमुष्टिं कुर्यात् साकुम्भमुद्रिकेति मंत्रा यथा इमम्मेव
रुणेति मंत्रस्य शुनःशेपऋषिर्वरुणोदेवता गायत्रीछन्दः अभिषेके विनियोगः इमम्मे वरुण
श्रुधीहवमद्या च मृडय त्वामवस्युराचके १ तत्त्वायामीति मन्त्रस्य शुनःशेपऋषिर्वरुणोदेवता त्रिष्टुप्
छंदः अभिषेके विनियोगः **ॐ तत्त्वायामि** ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः २ त्वन्नइति मन्त्रस्य वामदेवऋषिः अ
ग्निवरुणौ देवते त्रिष्टुप्छंदः अभि० **ॐ त्वन्नो** ऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ३ सत्वन्नइति मन्त्रस्य वामदेवऋ।

CC-0 In Public Domain. Digitzed by eGangotri

षिः अग्नीवरुणो देवते त्रिष्टुप्छंदः अभिषे० ॐ सत्वन्नो ऽअग्नेवमोभवोतीनेदिष्ठोअस्या ऽउ
षसोव्युष्टौ अवयक्ष्वनो वरुणं रराणोवीहि मृडीकं सुहवोनऽएधि ४ मापइति प्रजापतिऋ
षिर्हृदयशूलं देवता यजुः अभिषे० ॐ मापो मौषधीर्हिंसीर्धाम्नोधाम्नोराजंस्ततोवरुणनोमुञ्च
यदाहुरघ्न्या इति वरुणेतिशपामहे ततोवरुणनोमुञ्च ५ उदुत्तममितिमंत्रस्य शुनःशेपऋषिर्व
रुणोदेवतात्रिष्टुप्छंदः अभिषेकेविनियोगः ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्र
थाय अथावयमादित्यव्रतेतवानागसोऽदितयेस्याम ६ मुञ्चन्त्विति मन्त्रस्याथर्वणो
भिषक् बन्धुऋषिरोषधयोदेवता अनुष्टुप्छन्दः अभिषेकेविनियोगः ॐ मुञ्चन्तु मा शपथ्याद।
थोवरुण्यादुत अथोयमस्यपड्वीशात् सर्वस्माद्देवकिल्बिषात् ७ अवभृथेत्यस्यप्रजापतिऋषि
र्यज्ञोदेवता अनुष्टुप्छंदः अभिषेकेविनियोगः ॐ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः अ
वदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पाहि ८ ततस्त्वसौ निमा
ज्यान्मस्पाचामेत् ततोवक्ष्यमाणेरोङ्कारादिभिर्मन्त्रैः प्रतिमन्त्रं ऊर्ध्वपात्रेयेण सजलेन नाभिदक्षिण
पार्श्वमारभ्यवामपाणिनाशिरोपरिनीत्वा नाभिवामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं पावयेत् मन्त्रायो
गा ॐकारस्यब्रह्मा ऋषिः परमात्मादेवता गायत्रीछन्दः पावनेविनियोगः ॐ पुनातु म
हाव्याहृतीनां प्रजापतिऋषिः अग्निवायुसूर्योदेवता गायत्र्युष्णिगनुष्टुप् छन्दांसिपावनेविनियोगः।
ॐ भूः पुनातु २ ॐ भुवः पुनातु ३ ॐ स्वः पुनातु ४ तत्सवितुरिति विश्वामित्रऋषिः सवि

CC-0 In Public Domain. Digitzed by eGangotri

तादेवता गायत्रीछंदः पावनेविनियोगः ॐतत्स वितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोद
यात् ॐशुनात ५ आपोहिष्ठेतितिसृणां सिन्धुद्वीपऋषि रापोदेवता गायत्रीछन्दः पावनेविनियो
गः ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणायचक्षसे ६ योवःशिवतमोरसस्तस्य
भाजयतेहनः उशतीरिवमातरः ७ तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ आपोजनयथाचा
नः शुनात ८ इदमित्यस्य प्रजापतिऋषि रापोदेवता महापंक्तिछन्दः पावनेविनियोगः ॐइद
मापः प्रवाहतावद्यञ्चमलञ्चयत् यच्चाभिदुद्रोहानृतं यच्चशेपेऽअभीरुणं आपोमातस्मादेनसः
पवमानश्चमुञ्चतुशुनात ९ हविष्मतीरित्यस्य प्रजापतिऋषि लिङ्गोक्तादेवता अनुष्टुप्छ
न्दः पावनेविनियोगः ॐ हविष्मतीरिमाऽआपोहविष्मा२ँ आविवासति हविष्मान्देवोऽअ
ध्वरोहविष्मा२ँ ऽअस्तुसूर्यः शुनात १० देवीरापऽइत्यस्य प्रजापतिऋषि रापोदेवता पंक्तिछंदः
पावनेविनियोगः ॐदेवीरापोऽअपान्नपाद्योवऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः तन्देवे॥
भ्योदेवत्रादत्तशुक्रपेभ्यो येषांभागस्थस्वाहा शुनात ११ कार्षिरसीत्यादीनांत्रयाणांप्रजापतिऋ
ऋषिः कार्षिरसीत्यस्याहरचतुष्टयस्याज्यंदेवता समुद्रस्यत्वामापइत्यस्य आपोदेवता त्रयाणाम
नुष्टुप्छंदः पावनेविनियोगः ॐकार्षिरसिसमुद्रस्यत्वा क्षित्याऽउन्नयामि समापोऽअद्भिरग्मा
नसमोषधीभिरोषधीः शुनात १२ अपोदेवताइत्यस्य वरुणऋषि रापोदेवता त्रिष्टुप्छन्दः पावने
विनियोगः ॐ आपोदेवतामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ताभिर्मित्रावरुणावभ्य

CC-0 In Public Domain. Digitzed by eGangotri

विश्वन्मामिभिरिन्द्रमनयन्नत्यरातीः पुनातु १३ द्रुपदादिवेत्यस्य प्रजापत्याश्विसरस्वत्यऋषयः आ
पोदेवता अनुष्टुप्छन्दः पावनेविनि० ॐ द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव पूतंपवित्रे
णेवाज्यमापःशुन्धन्तुमैनसः पुनातु १४ शन्नोदेवीत्यस्य सिन्धुद्वीपऋषिः गायत्रीछंदः आपोदेव
तापावनेविनियोगः ॐ शन्नो देवीरभिष्टयऽआपोभवन्तुपीतये शंयोरभिस्रवन्तुनः पुना
तु १५ अपांरसमित्यस्य बृहस्पतिऋषिः रसोदेवता अनुष्टुप्छन्दः पावनेविनियोगः
ॐ अपांरसमुद्वयसंᳪसूर्य्येसन्तंᳪसमाहितम् अपांरसस्ययोरसस्तंवोगृह्णाम्युत्त
ममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषते योनिरिन्द्रायत्वाजुष्टतमम् पुनातु १६
आपोदेवीरित्यस्य सिन्धुद्वीपऋषिः आपोदेवता न्यंकुसारिणीबृहतीछन्दः पावनेविनियोगः
ॐ आपो देवीरुपसृज मधुमतीरयक्ष्मायप्रजाभ्यः तासामास्थानादुज्जिहतामोषधयःसुपि
प्पलाःपुनातु १७ पुनन्तुमेत्यस्य प्रजापतिऋषिः पितरोदेवता अनुष्टुप्छन्दः पावनेविनियो
गः ॐ पुनन्तुमा पितरःसोम्यासःपुनन्तुमापितामहाः पुनन्तुप्रपितामहाः पवित्रेणशता
युषा पुनातु १८ पुनन्तुमेत्यस्य प्रजापतिऋषिः पितरोदेवता अनुष्टुप्छंदः पावनेविनियो
गः ॐ पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै पुनातु
१९ अग्नइत्यस्य वैखानसऋषिः अग्निर्देवता अनुष्टुप्छंदः पावनेविनियोगः ॐ अग्नऽआयूंᳪ
षिपवसऽआसुवोर्जमिषञ्चनः आरेबाधस्वदुच्छुनाम् पुनातु २० पुनन्तुमेत्यस्य प्रजापतिऋ

CC-0 In Public Domain. Digitzed by eGangotri

११

षिः लिङ्गोक्ता देवता अनुष्टुप्छंदः पावने विनियोगः ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धि
यः पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा पुनातु ३९ पवित्रेण पुनीहि मेत्यस्य प्रजापतिऋ
षि रग्निर्देवता गायत्रीछंदः पावने विनियोगः ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् अ
ग्ने क्रत्वा क्रतूँ२ ऽरनु पुनातु यत्त इति प्रजापतिऋषि रग्निर्देवता तृतीयपादस्य ब्रह्मा देवता
गायत्रीछंदः पावने विनियोगः ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ब्रह्म तेन पुनातु मा पुनातु
४१ पवमान इत्यस्य प्रजापतिऋषिः सोमो देवता गायत्रीछंदः पावने विनियोगः ॐ पवमानः
सो ऽद्य नः पवित्रेण विचर्षणिः यः पोता स पुनातु मा पुनातु ४२ उभाभ्यां देवेत्यस्य प्रजाप
तिऋषिः सविता देवता गायत्रीछंदः पावने विनियोगः ॐ उभाभ्यां देव सवितः पवित्रेण
सवेन च मां पुनीहि विश्वतः पुनातु ४३ वैश्वदेवी पुनतीत्यस्य प्रजापतिऋषि विश्वेदेवा देवता
त्रिष्टुप्छंदः पावने विनियोगः ॐ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् पुनातु उदकं स्पृशेत् ४४ अग्निष्टो
मकर्माणि दीक्षितकर्तृक पावनवत्या वन मंत्रजपः पवित्रैश्चित्पतिर्मेति पावयतीति सूत्रदर्श
नात् चित्पतिर्मेत्रयाणां प्रजापतिऋषिः चित्पतिर्मा वाक्पतिर्मेत्युभयोः प्रजापतिर्देवता देवो
मेत्यस्य सविता देवता यजुः पावने विनियोगः ॐ चित्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण
सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् पुनातु १० प

वेनाभेरूर्ध्वमाप्लावयित्वा **वाक्** पतिर्मा पुनात्वच्छिद्रेणेत्याद्यारभ्य तच्छकेयमित्यन्तेन नाभेर्मध्यं पा
वयेत् ॐ **वाक्** पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपू
तस्य यत्कामः पुने तच्छकेयम् इत्यनेन मध्यं देवो मा सविता पुनात्वच्छिद्रेणेत्याद्यारभ्य तच्छके
यमित्यन्तेन नाभेरधः प्लावयेत् ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् पुनःसमुच्चयेन सर्वाङ्गमाप्लावयेत्
ततः पूर्वोक्तप्रकारेण ॐ पुनातु १ ॐ भूः पुनातु २ ॐ भुवः पुनातु ३ ॐ स्वः पुनातु ४ ॐ तत्स
वितु० पुनातु **तत्र मन्त्रक्रमः** इममे तत्त्वा० त्वन्नः० सत्वन्नः० ॥ ॐ मापो मौषधीर्हि
ꣳसीर्धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो
मुञ्च उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय अथा वयमादित्य व्रते तवाना
गसो अदितये स्याम मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत अथो यमस्य पड्वीशात्सर्वस्माद्देवकि
ल्बिषात् ११ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः अव देवैर्देवकृतमेनोयासिषमव मर्त्यै
र्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ततः अपाघमित्यनेनापामार्गैस्त्रिभिर्मार्जयेत् अपाघमित्य
स्य शुनःशेप ऋषिः लिङ्गोक्ता देवता अनुष्टुप्छन्दः अपामार्जने विनियोगः ॐ अपाघमप
किल्बिषमपकृत्यामपो रपः अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव पुनातु ततः काण्डात्काण्डादि
ति मन्त्रेण दूर्वास्त्रिभिस्त्रिभिर्मार्जयेत् काण्डात्काण्डादित्यस्याग्निर्ऋषिर्दूर्वेष्टका देवता अ

CC-0 In Public Domain. Digitized by eGangotri

ष्टुप्छन्दः मार्जने विनियोगः ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि एवानो दूर्वे प्र
तनु सहस्रेण शतेन च ४२ ततो वक्ष्यमाण षट्पदाणमन्त्रमेनान्तर्जले मग्नो त्रिरघ
मर्षयेत् ऋतञ्च सत्यञ्चेत्यस्याघमर्षण ऋषिः भाववृत्तो देवता अनुष्टुप्छन्दः अघमर्षणे विनि
योगः ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रो अर्णवः स
मुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचन्द्रम
सौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वः त्रिरावर्तयेत् द्रुपदेत्यस्या
ऋष्यादीनां स्मरणं पूर्ववत् अघमर्षणे विनियोगः ॐ द्रुपदा दिव मुमुचानः स्विन्नः स्नातो म
लादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः इति वा त्रिः पठेत् आयं गौरित्येषां त्रयाणां प्रजा
पतिऋषिरग्निः परावररूपो देवता गायत्रीछन्दः अघमर्षणे विनियोगः ॐ आयङ्गौः पृश्निर
क्रमीदसदन्मातरम्पुरः पितरञ्च प्रयन्त्स्वः ३ इति वा ऋचं त्रिरावर्तयेत् सशिरसं प्राणाया
मं वा त्रिः पठेत् ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितु० स्वरो
म् ॐ इति वा त्रिः पठेत् यद्वा परमात्मानं विष्णुं शेषशायिनं सायुधं सश्रीकं ध्यायेत् ततः स्ना
नाङ्गतर्पणं विष्णुः स्नातस्यार्द्रवाससा देवर्षिपितृतर्पणमम्भस्थ एव कुर्वीतेति पराशरोक्तेः नित्यनै
मित्तिकं काम्यं त्रिविधं स्नानमुच्यते तर्पणं तु भवेत्तस्य तदङ्गत्वेन कीर्तितं बाह्यस्थाने तिलैः कृत्वा जला
श्यं तर्पयेत्पितॄन् स्थलस्थेन न कर्तव्यं पितॄणां तिलमिच्छता रोमस्थैस्तिलैर्न तर्पयेदिति वृ

CC-0 In Public Domain. Digitzed by eGangotri

ब्रह्मयज्ञोत्तरतर्पणप्रयोग **ॐ मोदस्तृप्यतु** १ प्रमोदस्तृप्यतु २ सुमुखस्तृप्यतु ३ दुर्मुखस्तृप्यतु ४ अविघ्नस्तृप्यतु ५ विघ्नकर्ता तृप्यतु ६ ब्रह्मादयो देवास्तृप्यन्तु ७ गौतमस्तृप्यतु ८ भरद्वाजस्तृप्यतु ९ विश्वामित्रस्तृप्यतु १० जमदग्निस्तृप्यतु ११ वसिष्ठस्तृप्यतु १२ कश्यपस्तृप्यतु १३ अत्रिस्तृप्यतु १४ दक्षस्तृप्यतु १५ मरीचिस्तृप्यतु १६ अङ्गिरास्तृप्यतु १७ पुलहस्तृप्यतु १८ पुलस्त्यस्तृप्यतु १९ क्रतुस्तृप्यतु २० प्रचेतास्तृप्यतु २१ भृगुस्तृप्यतु २२ मनवस्तृप्यन्तु २३ इति गोशृङ्गमात्रं जलमुद्धृत्य देवतीर्थेन एकैकमञ्जलिं जले प्राङ्मुखः क्षिपेत् येन तीर्थेनाञ्जलिग्रहणं तेनैव प्रक्षेपः सर्वत्र अथोदङ्मुखो निवीती ऊर्द्धजानुः तिरश्चो दक्षिणाग्रान् कुशान्कृत्वोदगग्रान्वा प्राजापत्येन तीर्थेन सनकादींस्तर्पयेत् **सनकादयो मनुष्यास्तृप्यन्तु** द्वौ द्वावञ्जली ततोऽपसव्यं तानेव कुशान्मूलाग्राभ्यां द्विगुणीकृत्य दक्षिणामुखः पितृतीर्थेन कव्यवाडनलादींस्तर्पयेत् **कव्यवाडनला**दयो देवपितरस्तृप्यन्तु त्रयोऽञ्जलयः **अस्मत्पितरः** पितामहास्तृप्यन्तु मातामह प्रमातामह वृद्धप्रमातामहास्तृप्यन्तु आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यतु अत्र पराशरः शुक्लैस्तु तर्पयेद्देवान्मनुष्याञ्छबलैस्तिलैः पितॄन् संतर्पयेत् कृष्णैः तर्पणे सर्वदा द्विज इति आश्वलायनः स्नानाङ्गतर्पणं कृत्वा यक्ष्मणे जलमाहरेत् यन्मया दूषितं तोयं मलैः शारीरसम्भवैः तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकं ततस्तीरमागत्य अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिं

CC-0 In Public Domain. Digitzed by eGangotri

इति जलाञ्जलिं तटे निक्षिपेदिति **स्नानाङ्गतर्पणम्** एवमुक्तविधिना स्नानाङ्गतर्पणं कृत्वा जला
द्बहिर्निष्क्रम्य व क्ष्यमाणलक्षणे वास सी परिधाय वक्ष्यमाणलक्षणासने प्रागास्यो वोदगास्य
उपविशेत् ततो गङ्गादितीर्थमृत्तिकया गार्हपत्याग्निभस्मना वा गोपीचन्दनेन वा यथाधि
कारी भाले त्रिपुण्ड्रं मूर्ध्वपुण्ड्रं वा तिलकं कुर्यात् **पुण्ड्रलक्षणम्** ऊर्ध्वपुण्ड्रं द्विजः कुर्यात् क्ष
त्रियस्तु त्रिपुण्ड्रकं अर्धचन्द्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु १ दग्धं जीर्णं च मलिनं मूषकापहृतं तथा
खादितं गोमहिषाद्यैः त्याज्यं सर्वथा द्विजैः २ परिधानवस्त्रलक्षणम् अरजकप्रक्षालिते सदशे शु
क्ले अनग्निदग्धे अच्छिद्रे अस्यूते गैरिकादिरागेनाविकृते शुक्ले कार्पासनिर्मिते परिधानीयोत्तरीये
धारयेत् ततो द्विराचामेत् जीवत्पितृकेणोत्तरीयं न धार्यं उत्तरीयं योगपट्टं तर्जन्यां रजतं तथा न जी
वत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदीति वचनात् ततः कटेरधस्ताद्धस्तान्तं मृदा त्रिर्लिप्य प्रक्षाल्या
न्तरं मणिबन्धादङ्गुल्यग्रपर्यन्तौ पाणी मृदा त्रिर्लिप्य प्रक्षालयेत् आसनलक्षणम् श्रीपर्ण्यादिशुष्कदारु
निर्मितं कुशात्रयाच्छन्नं निधापयेत् ततः कुशापवित्रोपग्रहपाणिः पादौ जले स्थले कृत्वा पूर्ववद्द्विराच
म्य भगवन्तं परमात्मरूपं नारायणं स्मृत्वा मध्याह्नसन्ध्योपासनमारभेत् तत्रैव क्रमः अथ मध्या
ह्नसंध्या तत्र विशेषः उपात्तदुरितक्षयद्वारा रुद्रावाप्त्यै मध्याह्नसन्ध्योपासनमहं करिष्ये आगच्छ
वरदे देवि त्र्यक्षरे रुद्रवादिनि सावित्रिच्छन्दसां मातः रुद्रयोने नमोऽस्तु ते २ पूर्वं मध्याह्नसन्ध्यास्व
रूपं विभावयेत् तदित्थं मध्याह्नसन्ध्या श्वेतपद्मा श्वेतासनस्था श्वेतांबरा श्वेतवर्णा श्वेतमाल्यानुलेपा

CC-0 In Public Domain. Digitzed by eGangotri

ना पञ्चमुखीदशभुजात्रिनेत्रात्रिशूलाक्षमाला कमण्डलुकपालधारिणी सर्वाभरणभूषिता सा
वित्रीसवती वृषभवाहिनी यजुर्वेदसहिता रुद्रदेवत्या त्रिपदा षट्कुक्षिः पञ्चशीर्षाग्निमुखा रुद्र
शिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनसगोत्रा शुक्लवर्णा कर्मज्ञाने विनियोगः ततः प्राणाया
मं कुर्यात् स यथा ओंकारस्य ब्रह्मा ऋषिर्गायत्री छन्दः परमात्मा देवता प्राणायामे विनियोगः
ओं सप्तव्याहृतीनां प्रजापति विश्वामित्र जमदग्नि भरद्वाज गोतमात्रि वसिष्ठ कश्यपा ऋषयः
अग्निवायुसूर्यबृहस्पति वरुणेन्द्रविश्वेदेवा देवताः गायत्र्युष्णिगनुष्टुब् बृहतीपंक्ति त्रिष्टुब् ज
गत्यश्छन्दांसि प्राणायामे विनियोगः तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री
छन्दः प्राणायामे विनियोगः आपोज्योतिरिति प्रजापतिर्ऋषिः ब्रह्माग्निवायुसूर्या देवताः द्वि
पदा गायत्री छन्दः प्राणायामे विनियोगः एवं ऋष्यादिकं स्मृत्वा बद्धासनो मौनी संमिलितन
यनो दक्षिणपाण्यङ्गुष्ठेन दक्षिणनासिकां पीडयन्तथा कनिष्ठिकानामिकाभ्यां उत्तरनासिकां।
पीडयन् मध्यमातर्जन्यौ मुञ्चन् सव्याहृतिकां सप्रणवां सशिरस्कां गायत्रीं पूरककुम्भकरे
चकक्रमेण त्रिः पठेत् ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितु०
रोम् इति मन्त्रान्तं यावदाहृत्य मनसा पठेत् ततश्चापः पुनन्त्वित्याचमनं कुर्यात् आपः पुनन्त्वि
ति मन्त्रस्य कश्यप ऋषिः आपो देवता अनुष्टुप्छन्दः आचमने विनियोगः ओं आपः पुनन्तु पृ।
थिवीं पृथिवी पूता पुनातु मां पुनातु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा

CC-0 In Public Domain. Digitzed by eGangotri

१७ दुश्चरितं मम सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहंस्वाहेति मन्त्रेण सकृदप आचम्य पश्चात्तीच मनो
कृताऽऽचामान् कुशान्दक्षिणपाणौ धृत्वा आपोहिष्ठेत्यादित्र्यृचेन नवभिः पादैः प्रतिपादं शिरोहृ
दयपादयुगलानि मार्जयेत् आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिः आपो देवता गायत्रीछ
न्दः मार्जने विनियोगः ॐ आपोहिष्ठा मयोभुवः शिरसि १ ॐ ता न ऊर्जे दधातन पादयोः ॐ म
हे रणाय चक्षसे हृदये ३ यो वः शिवतमो रसः हृदये ४ ॐ तस्य भाजयतेह नः पादयोः ५
ॐ उशतीरिव मातरः शिरसि ६ ॐ तस्मा अरं गमाम वः शिरसि ७ ॐ यस्य क्षयाय जिन्वथ
हृदये ८ ॐ आपो जनयथा च नः पादयोः ९ **तथाच स्मृतिः** आपोहिष्ठेत्यृचैः कुर्यान्मा
र्जनन्तु कुशोदकैः प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे इति ततश्चुलकेन जलमादाय तस्मि
न्नासिकाग्रं निधाय द्रुपदादिवेति ऋचं पठित्वा तज्जलं भूमावुत्सृज्य षड्भ्याणि पद्माणि चोद्वमि
श्राणञ्जलिनादायोत्थाय प्रणवव्याहृतिपूर्विकया गायत्र्यैकाञ्जलिं सूर्याभिमुखस्तूत्क्षिपे
त् तत ऊर्ध्वबाहुः सूर्यमुदीक्षमाणो वक्ष्यमाणैर्मन्त्रैः सूर्योपस्थानं कुर्यात् तत्र मन्त्रा यथा
उद्वयमिति प्रस्कण्व ऋषिः सूर्यो देवता अनुष्टुप्छन्दः सूर्योपस्थाने विनियोगः ॐ उद्वयन्तम
सस्परि स्वः पश्यन्त उत्तरम् देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् १ उदुत्यमिति प्रस्कण्व
ऋषिः सूर्यो देवता गायत्रीछन्दः सूर्योपस्थाने विनियोगः ॐ उदु त्यञ्जातवेदसन्देवं वहन्ति
केतवः दृशे विश्वाय सूर्यम् २ चित्रं देवानामिति कुत्साङ्गिरस ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः

CC-0 In Public Domain. Digitzed by eGangotri

सूर्योपस्थाने विनियोगः ॐ चित्रं देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः आप्राद्यावापृथि-
वी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ३ तच्चक्षुरिति दध्यङ्ङाथर्वणऋषिः सूर्यो देवता ब्रा-
ह्मी त्रिष्टुप्छन्दः सूर्योपस्थाने विनियोगः तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः
शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः
शतं भूयश्च शरदः शतात् ४ **अथ ध्यानं** ॐ तरुणार्कमण्डलमध्यस्थां युवतीं सर्वशुक्लां प-
ञ्चवक्त्रामग्निनेत्रामिन्दुकलाविभूषणां त्रिशूलखट्वाङ्गखड्गाङ्कुशमर्वकुशाचतुर्भुजां वृषभासनस्थां
रुद्रदैवत्यां यजुर्वेदमुदाहरन्तीं भूर्लोकाधिष्ठात्रीं सावित्रीं नामदेवतां ध्यात्वा यथाशक्तिर्जपेत्
तेजोसीति परमेष्ठी प्रजापतिर्यज्ञराज्यं देवता गायत्र्यावाहने विनियोगः ॐ तेजोसि शुक्र-
मस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि १ प्रणवस्य ब्रह्मा ऋषिः
परमात्मा देवता गायत्री छन्दः व्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवताः गायत्र्यु-
ष्णिगनुष्टुप्छन्दांसि तत्सवितुरिति विश्वामित्रऋषिः सविता देवता गायत्री छन्दः गायत्रीज-
पे विनियोगः ॐ भूर्भुवः स्वः तत्सवितु० ५ इति दशावरं शतमध्यं सहस्रपरमां वा जपेत्
ततो विभ्राडित्यनुवाकपुरुषसूक्त शिवसंकल्पमण्डलब्राह्मणैः सूर्यमुपतिष्ठे-
त् तत्र विभ्राडित्यस्य विभ्राट् सौर्य ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः उदुत्यमिति तिसृणां
प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छन्दः तं प्रत्नथेत्यस्य काश्यपो वत्सार ऋषिः सोमो दे-

CC-0 In Public Domain. Digitized by eGangotri

वता त्रिष्टुप्छन्दः अयंवेनइत्यस्य वेनऋषिः सोमोदेवता त्रिष्टुप्छंदः चित्रमित्यस्य कु
त्साङ्गिरसऋषिः सूर्योदेवता त्रिष्टुप्छन्दः आनइत्यस्य अगस्त्यऋषिः सूर्योदेवतात्रि
ष्टुप्छन्दः यदद्येत्यस्यश्रुतकक्षसुकक्षावृषी सूर्योदेवता गायत्री तरणिरित्यस्य प्र
स्कण्वऋषिः सूर्योदेवता गायत्रीछन्दः तत्सूर्यस्येतिद्वयोः कुत्सऋषिः सूर्योदेवता
त्रिष्टुप्छन्दः द्वितीयस्यसतोबृहतीछन्दः आयन्त इवेत्यस्य नृमेधाऋषिः सूर्योदे
वता बृहतीछन्दः आयादेवाइत्यस्य कुत्सऋषिः सूर्योदेवता त्रिष्टुप्छन्दः आकृष्णेने
त्यस्य हिरण्यस्तूपोङ्गिरसावृषी सूर्योदेवता त्रिष्टुप्छन्दः सूर्योपस्थानेविनियोगः ॥

ॐ विभ्राड्बृहत् विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपतावविह्रुतं वातजूतोयो
ऽअभिरक्षतित्मनाप्रजाः पुपोषपुरुधाविराजति १ उदुत्यम् उदुत्यञ्जातवेदसंदेवम्वह
न्तिकेतवः दृशेविश्वायसूर्यम् २ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ँ अनु त्वम्वरु
णपश्यसि ३ दैव्यावध्वर्यूदैव्यावध्वर्यूऽआगतंठं रथेनसूर्यत्वचा मध्वायज्ञंसमञ्जाथे
तम्प्रत्नथायम्वेनश्चित्रन्देवानाम् ४ तम्प्रत्नथा तम्प्रत्नथापूर्वथाविश्वथेमथाज्येष्ठता
तिम्बर्हिषदंस्वर्विदम् प्रतीचीनम्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनयासुवर्द्धसे ५ अ
यम्वेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने इममपांसङ्गमेसूर्यस्यशिशु
न्नविप्रामतिभीरिहन्ति ६ चित्रन्देवानाम् चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्यवा

CC-0 In Public Domain. Digitized by eGangotri

रुणस्याग्नेः आप्राद्यावापृथिवी अन्तरिक्षं सूर्य्य आत्मा जगतस्तस्थुषश्च ७ आनः आन इ
डाभिर्विदथे सुशास्ति विश्वानरः सविता देव एतु अपि यथा युवानो मत्सथा नो विश्वं जगदभि
पित्वे मनीषा ८ यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य्य सर्वं तदिन्द्र ते वशे ९ तरणिर्विश्वद
र्शतः तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य विश्वमाभासि रोचनम् १० तत्सूर्य्यस्य देवत्व
न्तन्महित्वम्मध्या कर्त्तोर्विततं सञ्जभार यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सि
मस्मै ११ तन्मित्रस्य तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे अनन्तमन्यद्रु
शदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति १२ वण्महाँ२ वण्महाँ२ असि सूर्य्य वडादित्य म
हाँ२ असि महस्ते सतो महिमा पनस्यतेद्धा देव महाँ२ असि १३ वट् सूर्य श्रवसा महाँ२
असि सत्रा देव महाँ२ असि मह्ना देवानामसुर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम् १४ आय
न्त इव सूर्य्यम् आयन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत वसूनि जाते जनमान ओजसा प्रति
भागन्न दीधिम १५ अद्या देवाः अद्या देवा उदिता सूर्य्यस्य निरंहसः पिपृता निरवद्यात् त
न्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः १६ आकृष्णेन रजसा व
र्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्
१७ **अथ पुरुषसूक्तं** सहस्रशीर्षेति षोडशानां नारायणः पुरुष ऋषिः पञ्चदशा
नामनुष्टुप् छन्दः षोडश्यास्त्रिष्टुप् छन्दः पुरुषो देवता सूर्योपस्थाने विनियोगः ओं सह

CC-0 In Public Domain. Digitized by eGangotri

सशीर्षापुरुषःसहस्राक्षःसहस्रपात् सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशांगुलम् १ पुरुषऽएवेद
ꣳसर्वंयद्भूतंयच्चभाव्यम् उतामृतत्वस्येशानोयदन्नेनातिरोहति २ एतावानस्य एतावानस्य
महिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ३ त्रिपादूर्ध्वः त्रिपादूर्ध्वऽ
दैत्पुरुषःपादोस्येहाभवत्पुनः ततोविष्वंव्यक्रामत्साशनानशनेऽअभि ४ ततोविराड ता
ताविराडजायतविराजोऽअधिपूरुषः सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ५ तस्माद्य
ज्ञात् तस्माद्यज्ञात्सर्वहुतःसम्भृतंपृषदाज्यम् पशूँस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ६
तस्माद्यज्ञात् तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे छन्दांꣳसिजज्ञिरेतस्माद्यजुस्तस्मा
दजायत ७ तस्मादश्वाः तस्मादश्वाऽअजायन्तयेकेचोभयादतः गावोहजज्ञिरेतस्मात्तस्मा
ज्जाताऽअजावयः ८ तंयज्ञम् तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाऽअयजन्त
साध्याऽऋषयश्चये ९ यत्पुरुषं यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखंकिमस्यासीत्।
किम्बाहूकिमूरूपादाऽउच्यते १० ब्राह्मणोस्य ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ऊरू
तदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत ११ चन्द्रमामनसः चन्द्रमामनसोजातश्चक्षोःसूर्योऽ
अजायत श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत १२ नाभ्याऽआसीत् नाभ्याऽआसीदन्तरि
क्षꣳशीर्ष्णोद्यौःसमवर्त्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाꣳऽअकल्पयन् १३ यत्पुरुषे
ण यत्पुरुषेणहविषादेवायज्ञमतन्वत वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः १४ स

CC-0 In Public Domain. Digitzed by eGangotri

त्राःस्य सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् १५
यज्ञेनयज्ञम् यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् तेहनाकम्महिमानः
सचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः १६ **अथशिवसंकल्पाः** यज्जाग्रत इति षड्ऋचस्य शि
वसंकल्पऋषिर्मनोदेवतात्रिष्टु० सूर्योपस्थानेविनियोगः **यज्जाग्रतः** यज्जाग्रतोदूर
मुदैतिदैवन्तदुसुप्तस्यतथैवैति दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसंकल्पमस्तु १
येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः यदपूर्वंयक्षमन्तःप्रजानान्त
न्मेमनःशिवसंकल्पमस्तु २ यत्प्रज्ञानम् यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्र
जासु यस्मान्नऋतेकिञ्चनकर्म्मक्रियते तन्मेमनःशिवसंकल्पमस्तु ३ येनेदम् येनेद
म्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्वम् येनयज्ञस्तायतेसप्तहोतातन्मेमनःशि
वसंकल्पमस्तु ४ यस्मिन्नृचःसामयजूँषियस्मिन्प्रतिष्ठितारथनाभाविवाराः यस्मि
ँश्चित्तँसर्वमोतम्प्रजानान्तन्मेमनःशिवसंकल्पमस्तु ५ सुषारथिरश्वानिवयन्मनुष्यान्नेनी
यतेऽभीशुभिर्वाजिनइव हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनःशिवसंकल्पमस्तु ६ **अ
थमण्डलब्राह्मणम्** मण्डलब्राह्मणस्य विवस्वानृषि र्वायुर्दे० सूर्योप० **यदे।**
तन्मण्डलन्तपतितन्महदुक्थन्ताऋचः सऋचांलोकोऽथयदेतदर्चिर्दीप्यतेतन् महाव्र।
तन्तानिसामानिससाम्नांलोकोऽथयऽएषऽएतस्मिन्मण्डलेपुरुषःसोऽग्निस्तानियजूँषि।

CC-0 In Public Domain. Digitzed by eGangotri

सयजुषांलोकः १ सैषात्रय्येवविद्यातपति तद्धैतदप्यविद्वांसमाहुस्त्रयीवाऽएषाविद्यात
पतीतिवाग्घैवतत्पश्यन्तीवदति २ सएषएवमृत्युर्यएषएतस्मिन्मण्डले
पुरुषोऽथैतदमृतंयदेतदर्चिर्दीप्यतेतस्मान्मृत्युर्नम्रियतेऽमृतेह्यन्तस्तस्मादुनदृश्यतेऽमृतेह्य
न्तः **तदेषश्लोकोभवति** तदेषश्लोकोभवत्यन्तरंमृत्योरमृतमित्यवरंह्येतन्मृ
त्योरमृतंमृत्यावमृतमाहितमित्येतस्मिन्हिपुरुषएतन्मण्डलेप्रतिष्ठितन्तपतिमृत्यो
र्विवस्वन्तंवस्तेऽइत्यसौवाऽआदित्योविवस्वानेषह्यहोरात्रेविवस्तेतमेषवस्ते सर्व
तोह्येतेनपरिवृतोमृत्योरात्माविवस्वतीत्येतस्मिन् हिमण्डलएतस्यपुरुषस्यात्मैतदे
षश्लोकोभवति ४ तयोर्वाएतयोरुभयोरेतस्यचार्चिषऽएतस्यच पुरुषस्यैतन्मण्डलं
प्रतिष्ठातस्मान्महदुक्थम्परस्मैनशंसेत् नेदेतांप्रतिष्ठांछिनदानीत्येतांह्यस्यप्रतिष्ठां
छिनत्तियोमहदुक्थंपरस्मैशंसतितस्माद्यस्यशंसंभूयिष्ठंपरिचक्षते प्रतिष्ठाह्यस्याह्नादि
भवतीत्यधिदेवतम् ५ **घृताचीयन्ते** यदेतन्मण्डलन्तपत्ययंसमुद्रोऽथयदेतदर्चि
दीप्यतेऽइदन्तत्पुष्करपर्णमापोह्येताआपःपुष्करपर्णमथ यएषएतस्मिन्मण्डलेपुरु
षोऽयमेवसयोऽयंहिरण्मयःपुरुषस्तदेतदेवैतत्त्रयं संस्कृत्येदोपदधन्नेतयजुस्तस्यैवाप्तु
मर्ध्वस्यामूर्द्ध्वंरुतत्क्रामतितदेनमथेतियथयंतपतितस्मादग्नितात्द्वियेतपरिहृत्यमसु
त्रयेवतदाभवतीत्यधिवाचीयन्ते ६ **घृताधानः** यदेतन्मण्डलंतपतियएषपुरुषःकश्च

दं तदुक्थं महदुक्थमथ यदेतदर्चिर्दीप्यते यद्वैतत्पुष्करपर्णमिदं तत्साम महाव्रतमथ य एष एतस्मि
न्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषो यमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ७ स एष एवा
लोकम्पृणा तामेव स सर्वोऽग्निरभिसम्पद्यते तस्यैतन्मिथुनं योऽयं सव्येऽक्षन्पुरुषोऽर्द्धमुहैत्
दात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यत्ते द्वे भवतो द्वन्द्वं
हि मिथुनं प्रजननं तस्माद्द्वे लोकम्पृणोऽउपधीयेते तस्मादु द्वाभ्यां द्वाभ्यां चितिं प्रणयन्ति ८
स एष ऽएवेन्द्रः स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यां देवा एतां विधृ
तिमकुर्वन्नासिकां तस्माज्जायाया अन्तेनाश्नीयाद्वीर्यवन्तमु ह सा जनयति यस्या अन्तेनाश्नाति।
९ **तदेतद्देवव्रतम्** तदेतद्देवव्रतꣳ राजन्यबन्धवो मनुष्याणां मनुतमां गोपायन्ति
तस्मादु तेषु वीर्यवाञ्जायतेऽत्ति वा ह्यन्नं यशसाꣳ सा हि प्रथयेनं जनयति १० **तौ हृदय**
स्याकाशं प्रत्यवेति तौ हृदयस्याकाशं प्रत्यवेत्य मिथुनी भवतस्तौ यदा मिथुनस्यान्तं गत्वा स
स्विद इव भवत्येवꣳ हैवैतदसंविद इव भवति दैवꣳ ह्येतन्मिथुनं परमो ह्येष आनन्दः ११
तस्मादेवंवित्स्वप्यात्तस्मादेवंविन्न यात्लोक्यꣳ हैतेऽएवैतद्देवते मिथुनेन प्रियेण धाम्ना
समर्द्धयति तस्मादु ह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनी भवन्त्यौ हिनसानीति तस्मा
दु हैतत्सुषुप्तस्य श्लेष्मणमिव मुखं भवत्येते एवैतद्देवते रेतः सिञ्चतस्तस्माद्रेतस इद
ꣳ सर्वꣳ सम्भवति यदिदं किञ्च १२ **स एष एव मृत्युः** स एष एव मृत्युर्य एष एतस्मि

CC-0 In Public Domain. Digitzed by eGangotri

५

मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्तस्यैते तस्याहृदये पादावतिष्ठतां तौ हैते तदाच्छि
द्योत्क्रमति स यदोत्क्रामत्यथ हैते तत्पुरुषो म्रियते तस्मादु हैतं तद्वैतमाहुराच्छेद्यस्येति १३ **ए**
षउ एव प्राणोऽथ हीमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्रा
णाः स्वा अपियन्ति तस्मात्स्वाप्ययः स्वाप्ययो ह वै तं स्वप्न इत्याचक्षते परोक्षं परोक्षकामा हि दे
वाः १४ **स एतैः सुप्तः** स एतैः सुप्तो न कस्यचन वेद न मनसा सङ्कल्पयति न वाचान्नस्य रसं
विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतं ह्येतेन तदापीता
भवन्ति स एष एकः सन् प्रजासु बहुधा व्याविष्टस्तस्मादेकः सन्नीलोके प्राणाः सर्वमग्निमप्यविभ
वत्यथ यदेक एव तस्मादेकः १५ **तदाहुः** तदेहुरेको मृत्युर्बहव ३ इत्येकश्च बहवश्चेति।
ह ब्रूयाद्यदहासावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः १६ **तदाहुः।**
तदाहुरन्तिके मृत्युर्दूरा ३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहायमिहाध्यात्मं तेनान्तिकेऽथ यद
सावमुत्र तेनो दूरे **तदेष श्लोको भवति** तदेष श्लोको भवत्यन्ते भात्याश्रितो रसानांश्रे
तरेमृत इति यदेतन्मण्डलं तपति तदन्तमथ य एष एतस्मिन्मण्डले पुरुषः सोऽन्तः स एतस्मि
न्नन्ते पाश्रितो भातीत्यधिदेवतं १७ **अथाध्यात्मं** अथाध्यात्ममिदमेव शरीरमन्तमथ योऽयं
दक्षिणेऽक्षन् पुरुषः सोऽन्तः स एतस्मिन्नन्ते पाश्रितो भाति १८ तमेतमग्निरित्यध्वर्यव उपासते य
जुरित्येष हीदं सर्वं युनक्ति सामेति छन्दोगा एतस्मिन् हीदं सर्वं समानमुक्थमिति ब

CC-0 In Public Domain. Digitzed by eGangotri

त्ह चाप्यहीदं सर्वमुत्याप्यति यावदिति यावद्विदपतेन हीदं सर्वं यतो विद्यामिति सर्वोऽस्य
इति सर्वविद्दुर्गमिति देवा रयिरिति मनुष्यामायेत्यसुराः स्वधेति पितरो देवजन इति देवजनवि।
दो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तं यथा यथोपासते तदेव भवति तद्धैनान्भूत्वावति त
स्मादेनमेवंवित्सर्वैरेवैतैरुपासीत सर्वं ह तद्भवति सर्वं हैतेनमेतद्भूत्वावति २० स एष
इष्टकोऽग्निः स एव इष्टकोऽग्निर्ऋगेका यजुरेका सामैका तद्यां कांचात्र चोपदधाति स॥
कमेव तस्याश्रायतनमथ यो यजुर्भाष्टरुषमाव तस्याश्रायतनमथ यार्थं मास्नापुष्करपर्ण
मेव तस्याश्रायतनमेवं त्रीष्टकः २१ तेवा एते तेवा एतेऽभेद्यच स्तकमेण तत्पुष्करपर्ण
मेतं पुरुषमपीतऽभेऽक्ष्यसामे यजुरपीत एव मवेकेष्टकः २२ स एष एव मृत्युः स एषा
स एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः स एष एवंविदश्चात्मा भव
ति स यदैवास्विदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्या
त्मा भवति २३ समस्तं मण्डलब्राह्मणं एवं कायवाङ्मनोभिर्नमस्कृत्यासनोपयुप।
विशेत् अथ ब्रह्मयज्ञः तस्य च कालः छन्दोगपरिशिष्टेऽभिहितः स चार्वाक् तर्पणात्का
र्यः पश्चाद्वा प्रातराहुतेः वैश्वदेवावसाने वा नान्यत्रेति निमित्तकात् ततः ब्रह्मयज्ञात् पू
र्वं स्वशरीरे सर्वोऽङ्गकमस्तु शोकन्यासान् कुर्यात् तेयथा मुखे ॐ तिऽथिविलाय
व मस्तायोर्धभ्रायनमः चक्षुषोः ॐ गौतमभरद्वाजाभ्यां नमः कर्णयोः ॐ विश्वामित्रजमद

CC-0 In Public Domain. Digitzed by eGangotri

ग्निभ्यां० नासापुटयोः ॐ वसिष्ठकश्यपाभ्यां० वाचि ॐ अत्रये नमः शिरसि ॐ गायत्र्यै नमो अग्
ये० ग्रीवायां ॐ उष्णिहे० सवित्रे पृष्ठवंशे ॐ बृहत्यै० बृहस्पतये० बाह्वोः ॐ बृहद्रथन्तराभ्यां०
द्यावापृथिवीभ्यां उदरे ॐ त्रिष्टुभे० इन्द्राय० कट्योः ॐ जगत्यै० आदित्याय प्रगाथान् स्पृशां
समवस्थले मन्त्राहुतिः शिश्ने ॐ अतिछन्दसे० प्रजापतये अपाने यज्ञा यज्ञियाय० वैश्वानराय० सक्
थ्योः ॐ अनुष्टुभे० विश्वेभ्यो० जान्वोः ॐ पंक्त्यै मरुद्भ्यो पादयोः ॐ द्विपदायै० विष्णवे प्राणायत
नेषु ॐ विछन्दसे वायवे हस्तद्वयविपर्यासेन मस्तकादिपादान्तं सर्वांगेषु ॐ न्यूनाक्षराय छ
न्दसे नमः अङ्गेभ्यो नमः एवं सर्वाङ्गन्यासविधिं कृत्वा **यथाशक्ति ब्रह्मयज्ञमारभेत्**
स यथा श्रीपरमेश्वरप्रीत्यर्थं **ब्रह्मयज्ञेनाहं यक्ष्ये** आसनोपरिन्यस्तेषु प्राग्ग्रेषु दर्भेषु स्व
स्तिकासनेन प्राङ्मुखोपविष्टः पाण्योर्मध्ये सपवित्रं दर्भमादाय दक्षिणोरौ मञ्जलीकृतमञ्ज
लिं निधाय प्रणवव्याहृतिपूर्विकां गायत्रीं जपित्वा ऋग्यजुसन्याय इषेत्वेत्यादि यथाशक्ति
ब्रह्मयज्ञं कुर्यात् इषेत्वेत्याद्यध्यायान्ते अनुवाकान्ते वा पठेत् अन्ते ॐ स्वस्तीति वदेत् ततउप
ग्रहव्यतिरिक्तदर्भान् उदीच्यां दिशि प्रक्षिपेत् ततआचामेत् एवं प्रत्यहं ब्रह्मयज्ञकरणे द्वितीय
दिने कृष्णोस्यावरेष्ट इत्यादि यथाशक्ति ब्रह्मयज्ञं कुर्यात् **अथवा** सम्पूर्णब्रह्मयज्ञकर
णाशक्तौ मंत्राद्यकाण्डिकां पठित्वान्तिमां काण्डिकां पठेत् ततः ब्राह्मणाद्यं पठित्वान्तिमां प
ठेत् समाचारात् एवमनुपर्वपर्यध्ययनेन अर्धाष्टकं ग्रन्थान् समापयेत् स्वरवर्णलयोपेतं मात्रा ॥

CC-0 In Public Domain. Digitzed by eGangotri

स्यान्नक्रियान्वितं वेदमेवं पठेयस्तु स्वाध्यायफलमश्नुते शौनकः ओंकारं व्याहृतीस्तिस्रो गायत्रीञ्च
पदं तथा मनसैव मन्त्रस्त्वन्यवेदादिकमुपक्रमेदिति गुरोः सकाशादपूर्वाध्ययनवद्ब्रह्मयज्ञा
ध्ययनेऽनध्यायदिवसेषु परित्यागप्राप्तौ मनुराह वेदोपाकरणे चैव स्वाध्याये चैव नैत्यके नानुरो
धोऽस्त्यनध्याये होममन्त्रेषु चैव हि नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतमिति तथा च स्मृतिः
तस्य वा एतस्य यज्ञस्य यद्वावनध्यायो यदात्मा शुचिर्यद्देशः इति अत्र विशेषो गौतमेनोक्तः अ
थ यदि वातो वायात् स्तनयेद्वा विद्युत्येद्वाऽवस्फूर्जेद्वा एकामृचमेकं वा यजुरेकं वा साम
भिव्याहरेत् ओं भूर्भुवः स्वः सत्यं तपः श्रद्धायां जुहोमीति अत्र वातो वा यादित्यनध्यायोपलक्ष
णं अतोऽनध्यायेऽध्येकामृचं पठेन्नाधिकमिति गम्यते एवं ब्रह्मयज्ञं विधाय तर्पणं कुर्यात् त
र्पणप्रयोगो यथा अथ सङ्कल्पः देशकालौ संकीर्त्य देवर्षिपितृतर्पणं करिष्ये ततस्त्रीन् दर्भान्
प्रागग्रान्दक्षिणपाणौ गृहीत्वा देवानावाहयेत् विश्वेदेवास इति गृत्समद ऋषिर्विश्वेदेवा देव
ता गायत्रीछन्दः आवाहने विनियोगः ओं विश्वेदेवास आगत शृणुता म इमं हवम् एदं बर्हि
र्निषीदत विश्वेदेवाः शृणुतेमं इति सुहोत्र ऋषिर्विश्वेदेवा देवता त्रिष्टुप्छन्दः जपे वि० विश्वेदे
वाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मि
न्बर्हिषि मादयध्वम् ततः सव्यकरान्वारब्धसजलदक्षिणकरेण तोयं गृहीत्वा तन्मात्रदेवती
र्थेन ओंकारपूर्वं ब्रह्मादिदेवांस्तर्पयेत् पञ्चशः प्राणे देवान्ब्रह्मऋषींस्तर्वांस्तर्पयेदक्षतोदकैः।

CC-0 In Public Domain. Digitzed by eGangotri

तर्पयेच्च पितॄन्भक्त्या सतिलोदकचन्दनैरिति योगियाज्ञवल्क्यः यद्युद्धृतं प्रसिञ्चेत्तु तिलान्सं
मिश्रयेज्जले अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः तत्रैव प्रकारः ॐ ब्रह्मास्तृप्यतामित्यभि
धाय जलमध्ये करस्थापः प्रक्षिपेदेवं विष्णुस्तृ० ॐ रुद्रस्तृ० अपांस्पर्शः ॐ प्रजापतिस्तृ० ॐ दे
वास्तृप्यं० ॐ छन्दांसितृ० ॐ वेदास्तृ० ॐ ऋषयस्तृ० ॐ पुराणाचार्यास्तृ० ॐ गन्धर्वास्तृ० ॐ
इतराचार्यास्तृ० ॐ संवत्सरः सावयवस्तृप्य० ॐ देव्यस्तृप्यन्तां ॐ अप्सरसस्तृप्यं० ॐ देवानु
गास्तृ० ॐ नागास्तृ० ॐ सागरास्तृ० ॐ पर्वतास्तृ० ॐ सरितस्तृ० ॐ मनुष्यास्तृ० ॐ यक्षास्तृ० ॐ
रक्षांसितृ० अपांस्पर्शः ॐ पिशाचास्तृ० ॐ सुपर्णास्तृ० ॐ भूतानितृ० ॐ पशवस्तृ० ॐ वनस्पत
यस्तृ० ॐ ओषधयस्तृ० ॐ भूतग्रामश्चतुर्विधस्तृप्यतां इति प्रत्येकमेकैकेन अञ्जलकेन तर्पयि
त्वोत्तराभिमुखो निवीती जलेतिरश्चः कुशान् कृत्वाञ्जलिनापो गृहीत्वा ॐ सनकस्तृप्यतामि
त्यभिधाय प्राजापत्यतीर्थेन द्वौ द्वावञ्जलीजले दत्त्वा ॐ सनन्दनस्तृ० ॐ सनातनस्तृ० ॐ कपि
लस्तृ० आसुरिस्तृ० ॐ वोढुस्तृप्यतां ॐ पञ्चशिखस्तृ० एवं द्वौ द्वावञ्जली एकैकस्मै दत्त्वा दक्षि
णाभिमुखः प्राचीनावीती सव्यं जान्वाच्य पात्रस्थेन तिलानादाय दक्षिणपाणौ गृहीत्वा तानेव कु
शान्दक्षिणाग्रमूलान् कृत्वा पितृतीर्थेनानया कव्यवाडनलादीना वाह्यायन्तन इति जपित्वा क
व्यवाडनलादींस्तर्पयेत् तद्यथा उशन्तस्त्वेति प्रजापतिर्ऋषिः पितरो देवता अनुष्टुप्छन्दः।
आवाहने विं० ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि उशन्नुशत आवह पितॄन्हविषेऽ।

CC-0 In Public Domain. Digitzed by eGangotri

अन्तेवे आयन्तुनइत्यस्य शङ्खऋषिः पितरोदेवता त्रिष्टुप्छन्दः जपेवि॰ ओंआयन्तुनःपितरः
सोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ततोद्वि
रञ्जलिंप्रपूर्यपितृतीर्थेनाञ्जलिंक्षिपेत् ओंकव्यवाडनलस्तृ॰ ओंसोमस्तृ॰ ओंयमस्तृ॰ ओंअग्निष्
वात्ताः पितरस्तृप्यन्तां ओंसोमपाः पितरस्तृ॰ बर्हिषदः पितरस्तृ॰ ओंयमायनमः ओंधर्मराजा
य॰ ओंमृत्यवे॰ ओंअन्तकायनमः ओंवैवस्वताय॰ ओंकालायनमः ॥ ओंसर्वभूतक्षयाय॰ ओंऔ
दुम्बराय॰ ओंदध्नाय॰ ओंनीलाय॰ ओंपरमेष्ठिने॰ ओंवृकोदरायनमः ओंचित्रायनमः ओंचित्रगुप्तायन
मः गोत्रनामपूर्वकंसव्यं ज्ञात्वाद्यपितृतीर्थेनदक्षिणाभिमुखेनद्विगुणदर्भेण तिलमिश्रितेनजा
लेनपित्रादिभ्यस्त्रीस्त्रीनञ्जलीन्दद्यात् अञ्जलिनियममाहव्यासः एकैकमञ्जलिंदेवाद्वौद्वौतुस
नकादयः अर्हन्ति पितरस्त्रीं स्त्रीं स्त्रियस्त्वेकैकमञ्जलमिति अमुकगोत्रोस्मत्पिताअमुकःशर्मातृ
प्यतामिदंजलंतस्मैस्वधा इत्येकाञ्जलिंदत्वैवमपरमञ्जलिद्वयं पित्रेदद्यात् ततःउदकोगोत्रो
स्मत्पितामह अमुक शर्मातृप्यतामिदंजलंतस्मैस्वधा एवमपरमञ्जलिद्वयंपितामहायदद्या
ततःप्रसेकाद्येकमेकंकुर्यात् तद्यथा उदीरतामित्यादिमडर्धवपर्यन्तं मधुवाताइति त्र्यर्चपर्य
न्तं यथाक्रमं मंत्रानुपांशुप्रायस्वरेण पठन्नञ्जलिकृतापोजलापिकरणेप्रक्षिपेत् उदीर
तामङ्गिरसआयन्तुनइतितिसृणां शङ्खप्रजापतिर्ऋषिः पितरोदेवता त्रिष्टुप्छन्दः ऊर्जं व
मित्यस्य प्रजापतिर्ऋषिः आपोदेवता विराट्छन्दः पितृभ्य इत्यस्य प्रजापत्याश्विसरस्वत्यऋष

CC-0 In Public Domain. Digitzed by eGangotri

३१ यः पितरोदेवता यज्ञं ये चेहेत्यस्य प्रजापत्याश्विसरस्वत्य ऋषयः पितरोदेवता त्रिष्टुप्छन्दः
मधुवाताइतितिसृणां गोतमऋषि विश्वेदेवादेवता गायत्रीछंदः सर्वेषांमन्त्राणां प्रसेकाख्ये
कर्मणिवि॰ ॐउदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः असुंयऽईयुरवृकाऽऋत
ज्ञास्तेनोवन्तुपितरोहवेषु १ ॐअङ्गिरसोनःपितरोनवग्वाअथर्वाणोभृगवः सोम्यासः तेषांव
यंठसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम २ ॐआयन्तुनःपितरः सोम्यासोग्निष्वात्ताः
पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ३ ॐऊर्जंवहन्तीरमृतङ्घृ-
तम्पयः कीलालम्परिस्रुतम् स्वधास्थतर्पयतमेपितॄन् ४ ॐपितृभ्यः स्वधायिभ्यः स्वधानमः
पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरोमीम
दन्तपितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ५ येचेहपितरोयेचनेहयाँश्चविद्मयाँ२ उचनप्र
विद्मत्वंवेत्थयतितेजातवेदः स्वधाभिर्यज्ञंसुकृतंजुषस्व ६ मधुवाताऋतायतेमधुक्षर
न्तिसिन्धवः माध्वीर्नःसन्त्वोषधीः ७ मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनः
पिता ८ मधुमान्नोवनस्पतिर्मधुमा२ अस्तुसूर्यः माध्वीर्गावोभवन्तुनः ९ ततःस्वपद्धत्य १
इत्यञ्जलित्रयंपित्रादिभ्योदद्यात् ततोमातृतर्पणंकुर्यात् तथाचक्रममाहव्यासः पितृभ्यःप्रा
थमंदद्यात्ततोमातृभ्यएव ततोमातामहानाञ्च तत्पत्नीनां ततोजलं मरीचिः अन्नमातामा
हान्कृत्वा मातृणांयःप्रयच्छति उदकंपिण्डदानञ्चनरकंसतुगच्छति मातृतर्पणेविशेषः

CC-0 In Public Domain. Digitzed by eGangotri

यथा अमुकगोत्राऽस्मन्माता अमुकदेवी तृप्यतामिदं जलं तस्यै स्वधा एवं द्विर्दद्यात् अमुकगोत्रास्म
त्पितामही अमुकदेवी तृप्य० अमुकगोत्रास्मत्प्रपितामही अमुकदेवी तृप्य० इति वाक्येन मा
त्रादिभ्यस्त्रीँस्त्रीनञ्जलीन्दद्यात् **वृद्धशातातपः** मातृभ्यश्च स्त्रियस्तिस्रस्तासां दद्याज्ज
लाञ्जलीन् त्रीँस्त्रीनेव तथान्यासां दद्यादेकैकमञ्जलिमिति ततो नमो व इत्यस्य प्रजापति
ऋषिः रसशोषजीवस्वधाघोरमन्यवः पितरो देवता पाठे विनि० ॐ नमो वः पितरो रसाय नमो
वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पि
तरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वा
सः १ इति पठित्वा अमुकगोत्रोऽस्मन्मातामह अमुकशर्मा तृप्यतामिदं जलं तस्मै स्वधा इति
मातामहायाञ्जलित्रयं दद्यात् अमुकगोत्रोऽस्मत्प्रमातामहो अमुकशर्मा तृ० धा इति प्रमाता
महायाञ्जलित्रयं दद्यात् अमुकगोत्रोऽस्मद्वृद्धप्रमातामहो अमुका० स्वधा इति वृद्धप्रमा० द
द्यात् ततः अमुकगोत्रास्मन्मातामही अमुकदेवी तृप्य० धा इति मातामह्यै० अमुकगोत्रास्म
त्प्रमातामही अमु० धा इति प्रमाता० अमुकगोत्रास्मद्वृद्धप्रमातामही अमु० स्वधा इति वृद्ध
प्रमातामहीभ्यः एकैकमञ्जलिं दद्यात् ततः आचार्यादीन्नामगोत्रस्वधाकारैस्तर्पयेत् आचार्यप
त्नीभार्यागुरुपितृव्यतत्पत्नीमातुलतत्पत्नीसख्यादीन् तर्पयेत् अमुकगोत्रोऽस्मद्गुरुरमु
कशर्मा तृप्यतामिदं जलं तस्मै स्वधा अमुकगोत्रास्मद्गुरुपत्नी अमुकदेवी तृप्यतामिदं जलं त

CC-0 In Public Domain. Digitized by eGangotri

स्यैस्वधेत्यादि ततोयेबान्धवाबान्धवावायेन्यजन्मनिबान्धवाः तेसर्वेतृप्तिमायान्तुयेचास्मत्तोयकां
क्षिणः येमेकुलेलुप्तपिण्डाः पुत्रदारविवर्जिताः तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकं आब्रह्म
स्तम्बपर्यन्तंदेवर्षिपितृमानवाः तृप्यन्तुपितरःसर्वेमातृमातामहादयः अतीतकुलकोटीनांसप्त
द्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं इतिमन्त्रैःपृथक्पृथक्तिलमु
दकंदद्यात् इतिबसानाञ्जलिंदद्यात् योगियाज्ञवल्क्यः वस्त्रनिष्पीडितंतोयंस्नातस्योच्छिष्टभा
गिनां भागधेयंश्रुतिःप्राहतस्मान्नपीडयेज्जले ततःस्नानवस्त्रप्रान्तंनिष्पीडयेत् येकेचास्मत्
कुलेजाताअपुत्रागोत्रिणोमृताः तेगृह्णन्तुमयादत्तंवस्त्रनिष्पीडनोदकं एवंस्नानवस्त्रंनिष्पी
ड्यप्राग्दग्वा तर्पणार्थंकुशान् परित्यज्य यज्ञोपवीतीभूत्वाचम्यजले ब्रह्मादिदेवानावाह्य वरु
णान्तांस्तल्लिङ्ग·मन्त्रैर्यथासम्भवोपचारैश्चन्दनाक्षतपुष्पादिभिर्ब्रह्मादिवरुणान्तानर्चयेत् तेमंत्राय
था ब्रह्मयज्ञानमितिप्रजापतिर्ऋषिर्विराडादित्योदेवता त्रिष्टुप्छन्दः पूजनेवि० ॐब्रह्मयज्ञानंप्रथ
मम्पुरस्ताद्विसीमतःसुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः १
ॐब्रह्मणेनमः ॐइदंविष्णुरितिमेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दः पूजनेविनि० ॐ
ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपांशुरेस्वाहा २ ॐविष्णवेनमः नमस्तइत्यस्य
परमेष्ठीऋषिः रुद्रोदेवता गायत्रीछन्दः पूजनेवि० नमस्तेरुद्रमन्यवउतोतइषवेनमः बाहु
भ्यामुततेनमः ३ ॐरुद्रायनमः अपांस्पर्शाः तत्सवितुरिति विश्वामित्रऋषिः सवितादेवता।

CC-0 In Public Domain. Digitzed by eGangotri

गायत्रीछन्दः पूजनेविनियोगः ॐतत्सवितु० ४ ॐसवित्रेनमः मित्रस्येत्यस्य विश्वामित्रऋषिर्मि
त्रोदेवता गायत्रीछन्दः पूजनेविनियोगः ॐमित्रस्यचर्षणीधृतोवोदेवस्यसानसि द्युम्नंचित्रश्रव
स्तमम् ५ ॐमित्रायनमः इमम्मेइत्यस्यशुनःशेपऋषि र्वरुणोदेवता गायत्रीछन्दः पूजनेविनि
योगः ॐइमम्मेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके ६ ॐवरुणायनमः एवंब्रह्मा
दिदेवानर्चयित्वोत्थायाद्दश्रमस्यहंसः शुचिषदित्येताभ्यां सूर्यमुपतिष्ठेत् अद्दश्रमेत्यस्य
प्रस्कण्वऋषिः सविता गायत्रीछन्दः सूर्योपस्थानेविनियोगः ॐअदृश्रमस्यकेतवोविरश्मयो
जनाँ२ ऽअनु भ्राजन्तोऽअग्नयोयथा उपयामगृहीतोसिसूर्यायत्वाभ्राजायैषतेयोनिःसूर्या
यत्वाभ्राजाय सूर्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम् हंसइत्यस्य
वामदेवऋषिः सविता देवता अतिजगतीछन्दः सूर्योपस्थानेविनियोगः ॐहंसःशुचिषद्वसु
रन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजा
ऽऋतंबृहत् ततःसूर्यं पूर्ववत्प्रदक्षिणीकृत्यादित्यायनमइति नमस्कृत्य वक्ष्यमाणैस्तत्तैर्ना
ममन्त्रैः प्राच्यादिदिक्षुतत्तद्दिग्देवताश्चनमस्कार्याः ॐप्राच्यैदिशेनमः ॐइन्द्रायनमः ॐ
इन्द्रायनमः ॐआग्नेय्यैदिशेनमः अग्नयेनमः ॐदक्षिणायै दिशेनमः यमायनमः ॐनैर्ऋत्यै
दिशेनमः निर्ऋतयेनमः ॐप्रतीच्यैदिशेनमः वरुणायनमः ॐवायव्यैदिशे० वायवेनमः
ॐउदीच्यैदिशे० सोमायनमः ॐऐशान्यैदिशे० ईशानायनमः ॐऊर्ध्वायैदिशे० ब्रह्मणेनमः

CC-0 In Public Domain. Digitzed by eGangotri

ॐ अवाच्यै दिशे॰ अनन्ताय नमः इति दिशो देवताश्च प्रणम्योपविशेत् ततो ब्रह्मादि वरुणपर्यन्तेभ्य
एकैकस्मै नमस्कुर्यात् अथवा योगि याज्ञवल्क्यमतेन उदकाञ्जलिं दद्यात् स यथा ॐ ब्रह्मणे
नमः अग्नये॰ पृथिव्यै॰ ॐ ओषधीभ्यो॰ वाचे॰ वाचस्पतये॰ विष्णवे॰ महद्भ्यो॰ अपांपतये॰
ॐ वरुणाय नमः एवं नमस्कारं कृत्वोदकं दत्वाञ्जलिना जलमादाय संवर्च्चसेति मन्त्रेण मुखं सं
स्पृश्य देवागातुविदिति मन्त्रेण स्नानादिकर्माङ्गभूतदेवता विसर्जयेत् संवर्च्चसेति परमेष्ठी ऋषि
स्त्वष्टा देवता त्रिष्टुप्छन्दः मुखमार्जने विनियोगः ॐ संवर्च्चसा पयसा सन्तनूभिरगन्महि मन
सा सꣳ शिवेन त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम् देवागातुविदिति मन्त्रस्य वाच
स्पतिः ऋषिर्वातो देवता विराट्छन्दः कर्माङ्गदेवताविस॰ ॐ देवा गातुविदो गातुं वित्त्वा गातु
मित मनसस्पत इमन्देव यज्ञꣳ स्वाहा वाते धाः एवं विधिना जीवत्पितृकेनापि ब्रह्मादिचित्रगु
प्तपर्यन्तं तर्पणं कृत्वा स्वपित्रादितर्पणं वस्त्रनिष्पीडनञ्च वर्जयित्वा ब्रह्मार्चनादि स्नानादिकर्मा
ङ्गभूतदेवता विसर्जनपर्यन्तं तर्पणविधिः विधेयः न जीवत्पितृकः कुर्याद्वस्त्रनिष्पीडनं पृथगिति
न जीवत्पितृकः कुर्यात् कृष्णैस्तिलैश्च तर्पणमिति लौगाक्षिवचनात् वस्त्रनिष्पीडनं पर्वादौ न भ
वति द्वादश्यां पञ्चदश्यां च संक्रान्तौ श्राद्धवासरे वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेदिति स्मृ
तेः केचित्तूत्तर ऋषितर्पणविधिना तु स्नानोत्तर तर्पणमध्ये वस्त्रनिष्पीडनं नेच्छन्ति योगिया
ज्ञवल्क्यवचनात् यावद्देवानृषींश्चैव पितॄंश्चैव न तर्पयेत् तावन्न पीडयेद्वस्त्रं येन स्नातो भवेत् ।

CC-0 In Public Domain. Digitzed by eGangotri

दके निष्पीडयति यः पूर्वं स्नानवस्त्रमतर्पिते । निराशाः पितरो यान्ति शापं दत्वा सुदारुणमिति ॥
निषेधवचनात्तदनुचितं वस्त्रनिष्पीडनविषये यन्निषेधवचनं तन्नहि विशेषतातद्विषयमेवे
ति प्रतीतत्वाद्वस्त्रनिष्पीडनं स्नानोत्तरतर्पणमध्ये एव कुर्यादिति श्रीदीक्षितकामदेवकृतो ॥
त्सर्गकारिकाटिप्पणी प्रतिपादितं केचित्स्नानकर्माङ्गभूतदेवता विसर्जनमन्त्रमेच्छन्ति तदा
प्ययुक्तं प्रयुक्तस्नानविधेः कर्मान्तरत्वाद्विसर्जनस्य तद्देवताविषयत्वस्य विसर्गे स्नानविधिं
समापयेदित्यपि कामदेवदीक्षितकारिकाटिप्पणी प्रतिपादितं एवमुक्तविधिना नित्यस्ना
माध्याह्निकसन्ध्यातर्पणानि समाप्य वक्ष्यमाणप्रकारेण सन्ध्यां सहितां गौतमादीन् सप्तर्षी
न् सप्रवरान् स्थापयेत् ॥ इति श्रीमन्महाराजाधिराजश्रीरणवीरसिं
ह भूपालाज्ञया जनार्दनभट्टेन पारस्करसूत्रानुसारतः संगृहीता स्नान
विधिपद्धतिः समाप्तिमगमत् शुभम् भूयात् ॥:

CC-0 In Public Domain. Digitzed by eGangotri

२० ॐ अथ ऋषिस्थापनपूजनप्रकारः कथ्यते सयथात्रकारिका स्थापयेद्द्यरुन्धतीं
प्रवरांश्च ततो धीमान् कुर्यात्तेषां प्रतिष्ठितिं इति कारिकार्थः स्थापयेद्द्यरुन्धतीमित्यत्र तत्रेत्यनुवर्तते
तस्मिन्कर्मणि अरुन्धतिसहितान्सप्तऋषीन् सप्रवरांश्च कुशमयान्कृत्वा स्थापयेत् यदा ऋष्यरु
न्धतीति पाठस्तदा समाहारद्वन्द्वैकवद्भावः ततश्च नपुंसकत्वादीकारस्य ह्रस्वता च यदा ऋष्य
रुन्धतिमिति पाठस्तदा ऋषिभिः सहिता अरुन्धतीति समासः कुर्यात्तेषां प्रतिष्ठितिमिति पाठे हि
यां क्तिन् यदा प्रतिष्ठितमिति पाठस्तदा भावे क्तः ततः स्थापनानन्तरं तेषां गोतमादीनां सप्तर्षीणां
मनोज्यूतिरिति मन्त्रेण प्रतिष्ठां कुर्यादित्यर्थः तथा चरेणुकारिका प्रतिष्ठाप्य मनोज्यूतिरिति
मन्त्रं समुच्चरन् इमावेवेति यजुषा नामान्येषां विनिर्दिशेदिति कारिकार्थः स्थापनानन्तरं गोतमा
दि सप्तर्षीणामिमामेवेति यजुषा नामसङ्कीर्तयेदित्यर्थः इमावेवेत्यत्रोक्ता एव पूजनीयाः गोत
मादीनि दाहृतवाक्यात् **अथ ऋषिस्थापनक्रमः** कर्ता पूर्वं त्रिभिस्त्रिभिर्दर्भपवित्रैः पृथ
क् पृथक् गायत्रीं पठित्वा ब्रह्मग्रन्थियुक्ताः सप्तर्षिवटवः कार्याः ततः पीठे प्रागग्राः स्थापनीयाः तत
आचम्य प्राणायामान् कृत्वा कुशाकुशमयजलपाणिर्देशकालौ संकीर्त्याध्यायोत्सर्गकर्माङ्गत्वेन ऋ
षिस्थापनपूजनमहं करिष्ये इति **संकल्पं कुर्यात्** ततश्चाक्षतान् गृहीत्वा ॐ भूर्भु
वः स्वः गोतममावाहयामि स्थापयामि भो गोतम इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः भरद्वा
ज मावाहयामि स्थापयामि भो भारद्वाज इहागच्छ ॥ ॥ इह तिष्ठ ॥ ॥

CC-0 In Public Domain. Digitzed by eGangotri

ॐभूर्भुवः स्वः विश्वामित्रमावाहयामि स्थापयामि भोविश्वामित्र इहागच्छेहतिष्ठ ॐभूर्भुवःस्वः जम
दग्निमावाहयामिस्थापयामिभोजमदग्ने इहागच्छेहतिष्ठ ॐभूर्भुवःस्वः वसिष्ठमावाहयामिस्थाप।
यामि भोवसिष्ठ इहागच्छेहतिष्ठ ॐभूर्भुवःस्वःकश्यपमावाहयामि· भोकश्यप इहागच्छेहति।
ष्ठ ॐभूर्भुवःस्वःअत्रिमावाहयामि स्थापयामि भोअत्रे इहागच्छेहतिष्ठ ॐभूर्भुवःस्वःअरुन्धतीमा
वाहयामिस्थापयामि भोअरुन्धति इहागच्छेहतिष्ठ एवं सप्तर्षीनावाह्य स्थापयित्वाऽनन्तरं।
दायमनोजूतिरिति मन्त्रेणप्रतिष्ठांकुर्यात् ॐमनोजूतिरित्यस्याङ्गीरसोबृहस्पतिऋषिर्यजुर्विश्वेदेवा
देवता ऋषिस्थापनेविनियोगः ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञ०॥
समिमन्दधातु विश्वेदेवासइहमादयन्तामोंप्रतिष्ठ १ अरुन्धतीसहिताःसप्तऋषयः सुप्रतिष्ठिता
भवंत्वित्युच्चार्यानन्तरंप्रार्थयेत् एवंप्रतिष्ठाप्यसप्तर्षय इदंविष्णुर्विचक्रमे इतिमन्त्राभ्यांषोडशो
पचारैः सप्तर्षीनर्चयेत् तत्रकारिकाअक्लिष्टान्स्नापयेद्विप्रान् सप्तऋषयइत्यृचा अर्चयेत्तेभ्यःप्रदा
नतःपूजनंचंदनादिभिः १ नैवेद्यैर्विविधैःपूज्यावेदस्पृहितमिच्छता ऋषीणांप्रीतयेदद्याउपवीता
न्यनेकशः २ ब्राह्मणांश्चमुनीन्भक्त्यातर्पणञ्चसमारभेत् ३ कारिकार्थः अक्लिष्टानिति तीर्थोदकैस्ता
न्विप्ररूपान् सप्तर्षीन् स्नापयेदित्यर्थः तथा रेणुकारिका मंत्राभ्यां सप्तऋषय इदंविष्णुर्विचक्रमे।
अर्चयेद्विप्ररूपांस्तान् गन्धाद्यैसोपवीतकैरिति अर्चयित्वेभ्य इतिवेदस्पृहितमिच्छताऽस्मात्तेभ्यः स
प्तर्षिभ्यः अक्षतैर्गोचैः प्रदानतःगन्धादिभिरुपचारैस्तेपूज्याः बहुप्रकारैर्नैवेद्यैस्तेप्रीणनीयाः ऋ

CC-0 In Public Domain. Digitzed by eGangotri

षीणां प्रीतये दद्यादिति ऋषीणां प्रीत्यर्थं बहूनि ब्रह्मसूत्राणि समर्पयेदित्यर्थः ॥ तथाच मदनरत्ने यज्ञोपवीतदानेन ब्रह्मवर्चस्वि जायते तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिता **नन्दिपुराणे** यज्ञोपवीतदानेन सर्वेभ्यो ब्राह्मणाय वा भवेद्धि प्रभवो वेदः सुदृढ्यो नात्र संशयः प्रणम्येति प्रेमणा मुनीन्सप्तर्षीन्नमस्कृत्य पूजनोत्तरं सप्तर्षीस्तर्पयेदित्यर्थः **अथ ऋषिपूजनक्रमः** समाचारात्पूजनात्पूर्वं कर्त्ता सप्त ऋषय इदं विष्णुर्विचक्रम इति मन्त्राभ्यां करादि मूर्द्धपर्यन्तदेहे न्यासान्कुर्यात् ते यथा सप्तर्षय इत्यस्यादित्य याज्ञवल्क्याद्वृषी सप्तऋषयो देवता जगतीछन्दः इदं विष्णुरित्यस्य मेधातिथिर्ऋषिः विष्णुर्देवता न्यासे विनियोगः ओं सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ १ ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांसुरे स्वाहा २ तथैव सप्तर्षिवन्न्यासान्कुर्यात् ततः सप्तऋषय इदं विष्णुर्विचक्रम इति मन्त्राभ्यां काण्डानुसमयेन गौतमादीन् पूजयेत् तत्रैवं प्रयोगः गौतमायासनं समर्पयामि एवं पाद्यमर्घ्यमाचमनीयस्नानादिस्तत्तिपाठान्तं गौतमं संपूज्य भारद्वाजादीन्पूजयेदेवमेव **अथवा** पदार्थानुसमयेन गौतमादीन् **पूजयेत्तत्रैवं प्रयोगः** गौतमाय पाद्यं एवं भरद्वाजादिभ्य उपचाराः ततः समाचारात् स्वस्वप्रवरान् पञ्चोपचारैः पूजयेत् **ततः सप्तर्षीन्तर्पयेत् तत्र मदनरत्ने** अग्निर्देवाश्छन्दांसि वेदान्षीन् पुराणाचार्यान्गन्धर्वानितराचार्यान्संवत्सरं च सावयवं पितॄनाचार्यानिति **सूत्रार्थः** षि

CC-0 In Public Domain. Digitzed by eGangotri

४. पृणतोः सहाचार्यो देवावादीन्तर्पयेत् तथा च कारिका देवांश्छन्दांसि वेदांश्च सनातनान्दर्षींस्तथा ता
था पुराणाचार्यांश्च गन्धर्वानितरांस्तथा ६ इतराचार्यमासांश्च मासान्देवांस्तथैव च संवत्सरं सा
वयवं स्वान्पितॄन्तर्पयेदथ ७ आचार्यः तर्पणैः सार्द्धमयमस्य च पञ्चभिः मंत्रैर्द्वाभ्यां च मूर्द्धेति मा
छन्दस्त्रितयेन च ८ एवं षोडशभिर्मन्त्रैः सप्तऋच्यपकया चतुर्भिस्तर्पयेद्देवीरिमावे वेत्यनेन
चेति ९ कारिकार्थं वेदानिति आचार्यशिष्या देवांश्छन्दांसीत्यादिना पितृनाचार्यानितरांश्चान्सू
त्रोक्तदेवांस्तर्पयेयुरित्यर्थः अथेति सूत्रोक्ता देवता तर्पणानन्तरमयं यज्ञ इत्यादीमावे वेत्यन्ते
न यजुषा मन्त्रोक्तदेवतास्तर्पयेयुरित्यर्थः **तथाचकात्यायनः** गौतमादीनृषीन्सम्भूत्वा
दर्भमयावपुनः पूजयित्वा विधानेन तर्पयेद्द च मुच्चरान्निति ऋग्यदूतां यज्ञरादीनामप्युपल
क्षणार्थं अतएव कारिकाकारेण माक्षेद इत्यादीनि यजूंष्युक्तानि आचार्यशिष्याः स्वपित्रादीन्त
र्पयेयुः **तत्रसूत्रे स्वांश्च तर्पयेयुरिति** तथा च कारिकास्वान्पितॄंस्तर्पयेदथेति अथेत्यनन्त
रं सूत्रविहिततर्पणानन्तरमित्यर्थः आचार्यं तर्पणैः सार्द्धमिति देवादितर्पणैः सहाचार्यं तर्पयेत्
तत्पूर्वं तर्पणावशिष्टतर्पणोन्तरमित्यर्थः तत्र आचार्यशिष्या अयं यज्ञ इत्यादि पञ्चभिः ईत्यादिद्वा
भ्यां माक्षेद इत्यादित्रिभिरेवच्छन्द इत्यादिषोडशभिः सप्तऋच्य प्रत्येकया अथवदेशः समाना
मासांजीवीत्यादिचतुर्भिर्विश्वापादैरिमावेवेत्येकेन यजुषा देवतीर्थेन ऋषींस्तर्पयेयुः ततः स्वा
पित्रादींस्तर्पयेयुः **जीवत्पितृकेण** देवायाचार्य तर्पणान्तं तर्पणं कर्तव्यं **ततः पितृ।**

CC-0 In Public Domain. Digitzed by eGangotri

तर्पणं विदाय मंत्रोक्तदेवांस्तर्पयेत् **अथ ऋषितर्पणक्रमः** कृतऋजुकुशोपग्रहाआ
चार्यशिष्यादेवतीर्थेनापो गृहीत्वा ऋषींस्तर्पयेत् ॐ देवास्तृप्यन्तां छंदांसि तृप्यन्तां वेदास्तृप्य
न्तां पुराणाचार्यास्तृप्यंतां गंधर्वास्तृप्यन्तां. इतराचार्यास्तृप्यन्तां संवत्सरस्सावयवस्तृप्यन्तां ॥
आचार्यास्तृप्यन्तां ततः प्राचीनावीती भूत्वा दक्षिणाग्रान्कुशान्धृत्वाञ्जलिना यवग्रहीत्वा तिलान्वि
क्षिप्य दक्षिणस्य स्वकेन पितृतीर्थेन नामगोत्रोच्चारणपूर्वकं पित्रादींस्तर्पयेत् **जीवत्पितृका**
स्तु आग्नेयकोणात् कृतापसव्यास्तिलमिश्राभिरद्भिराचार्यस्य पित्रादीन्तर्पयेत्तत्रैवं प्रकारः ॥
गोत्रा आचार्यपितरस्तृप्यन्तु स्वधेति प्रयोगः ततो यज्ञोपवीती भूत्वा पुंडरीकाक्षेत्यादि मंत्रैर्मंत्रो
क्तदेवतांस्तर्पयेत् **तत्रैवं प्रकारः** कर्त्तापाणौ कुशातिलजलान्यादाय गोत्रा अस्मत्पितृपि
तामह प्रपितामहादेवदत्त यज्ञदत्त विष्णुदत्तशर्माणः तृप्यध्वं स्वधा एवं मात्रादिभ्यः मातामहादिभ्यो दद्युः अयंपुरआदि पंचानां साध्या ऋषयो यजूंषि प्राणाः तेदेवताः मूर्द्धादि द्वयोर्देवा ऋष
यो यजूंषि लिंगोक्तादेवताः एवछन्द आदिषोडशानां परमेष्ठी ऋषिर्यजूंषि लिङ्गोक्तदेवता ऋ
षितर्पणे विनियोगः सप्तऋषय इत्यस्यादित्या याज्ञवल्क्या ऋषी सप्तऋषयो देवता जगतीछंदः
ऋषितर्पणे विनियोगः ॐ अयंपुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती
गायत्र्यै गायत्रक्रां गायत्रादुपांशुर्योस्त्रिवृत्तो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्रा
णं गृह्णामि प्रजाभ्यः १ अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी

CC-0 In Public Domain. Digitzed by eGangotri

ष्मीत्रिष्टुभः स्वारꣳ स्वारादंतर्यामोतर्यामात्पंचदशः पंचदशाद्बृहद्भरद्वाजऽऋषिः प्रजापतिगृहीतया
त्वया मनो गृह्णामि प्रजाभ्यः २ अयं पश्चात् अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षु
ष्यो जगती वार्षी जगत्याऽऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्र
जापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ३ इदमुत्तरात्स्वस्तस्य श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनु
ष्टुप्शारद्यनुष्टुभः ऐडमैडान्मन्थी मन्थिनऽएकविꣳशऽएकविꣳशाद्वैराजं विश्वामित्रऋषिः प्रजाप
तिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ४ इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः
पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवतः आग्रयणः आग्रयणात्त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्र
यस्त्रिꣳशाभ्याꣳ शाक्वररैवते विश्वकर्मऽऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्र
जाभ्यो लोकन्ताऽइन्द्रम् ५ मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोऽधिपतिश्छ
न्दो विश्वकर्मा वयः परमेष्ठी छन्दो बस्तो वयो विबलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो व
यस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छंदः सिꣳहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः
ककुप्छंदः ऋषभो वयः सतोबृहती छंदो नड्वान्वयः ६ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो
जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट् छन्दः पंचाविर्वयो गायत्री छन्दस्त्रिवत्सो
वयऽउष्णिक् छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दो लोकन्ताऽइन्द्रम् ७ मा छंदः प्रमा छंदः प्रतिमा
छन्दोऽअस्रीवयश्छन्दः पंक्तिश्छन्दऽउष्णिक् छन्दो बृहती छंदोऽनुष्टुप्छन्दो विराट् छन्दो गायत्री

CC-0 In Public Domain. Digitzed by eGangotri

५३ छन्दस्त्रिष्टुप्छन्दो जगतीछन्दः पृथिवीछन्दः ८ पृथिवीछन्दोन्तरिक्षञ्छन्दो द्यौश्छन्दः समाश्छ
न्दो नक्षत्राणिछन्दो वाक्छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यंछन्दो गौश्छन्दोजाश्छन्दो श्वश्छन्दः ९ अग्नि
र्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो दे
वता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता १० एवश्छन्दो वरिवश्छन्दः शम्भू
श्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः॥ सरिरं
छन्दः॥ ककुप्छन्दस्त्रिककुप्छन्दः काव्यंछन्दो अङ्कुपंछन्दोक्षरपङ्क्तिश्छन्दः पदपङ्क्ति
श्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः आच्छच्छन्दः ११ आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वि
यच्छन्दो बृहच्छन्दो रथन्तरंछन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः संस्तुप्छन्दो
नुष्टुप्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो विशालंछन्द श्छदिश्छ
न्दो दूरोहणंछन्दस्तन्द्रंछन्दो अङ्काङ्कंछन्दः १२ रश्मिना सत्याय सत्यञ्जिन्व प्रेतिना धर्मणा
धर्मञ्जिन्वान्वित्या दिवा दिवञ्जिन्व सन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्व प्रतिधिना पृथिव्या पृथिवी
ञ्जिन्व विष्टम्भेन वृष्ट्या वृष्टिञ्जिन्व प्रवयाह्नाहर्जिन्वानुया रात्र्या रात्रीञ्जिन्वोशिजा वसुभ्यो वसू
ञ्जिन्व प्रकेतेनादित्येभ्य आदित्याञ्जिन्व तन्तुना रायः १३ तन्तुना रायस्पोषेण रायस्पोषञ्जिन्व॥
संसर्पेण श्रुताय श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व वयोधसा
धीतेनाधीतञ्जिन्वाभिजिता तेजसा तेजो जिन्व १४ प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वा स॰

CC-0 In Public Domain. Digitzed by eGangotri

म्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा त्रिवृदसि २५ त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा विवृद॥
सि विवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वाक्रमोऽस्याक्रमाय त्वा सङ्क्रमोऽसि सङ्क्रमाय त्वो॥
त्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वाधिपतिनोर्जोर्जं जिन्व २६ राज्ञ्यसि प्राची दिग्वसवस्ते दे॥
वा अधिपतयोऽग्निर्हेतीनां प्रतिधर्त्ता त्रिवृत्त्वा स्तोमः पृथिव्यां श्रयत्वाज्यमुक्थमव्यथायै स्तभ्ना॥
तु रथन्तरं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्र॥
थन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च साद
यन्तु २७ विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्त्ता पञ्चदशस्त्वा स्तोमः
पृथिव्यां श्रयतु प्रउगमुक्थमव्यथायै स्तभ्नातु बृहत्साम प्रतिष्ठित्या अन्तरिक्ष ऋषय
स्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदा॥
ना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु २८ सम्राडसि प्रतीची दिगादित्यास्ते देवा॥
अधिपतयो वरुणो हेतीनां प्रतिधर्त्ता सप्तदशस्त्वा स्तोमः पृथिव्यां श्रयतु मरुत्वतीयमुक्थम
व्यथायै स्तभ्नातु वैरूपं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मा॥
त्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके॥
यजमानं च सादयन्तु २९ स्वराडस्युदीची दिङ्मरुतस्ते देवा अधिपतयः सोमो हेतीनां प्रति॥
धर्त्तैकविंशस्त्वा स्तोमः पृथिव्यां श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजं सा॥

CC-0 In Public Domain. Digitzed by eGangotri

मध्य प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादय
न्तु २० अधिपत्न्यसि बृहती दिग्विश्वे ते देवाऽ अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्त्ता त्रिणवत्रयस्त्रिं
शौ त्वा स्तोमौ पृथिव्यां श्रयतां वैश्वदेवाग्निमारुते उक्थेऽ अव्यथायै स्तभ्नीतां शाक्वररैव
ते सामनी प्रतिष्ठित्याऽ अन्तरिक्षऽ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विध
र्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु २१ अय
म्पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ पुञ्जिकस्थला च क्रतु
स्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते॥
नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः २२ अयन्दक्षिणा विश्वकर्म्मा तस्य रथ
स्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ मेनका च सहजन्या चाप्सरसौ यातुधाना हेती रक्षांसि प्रहे
तिस्तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः २३ अय
म्पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्सर
सौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि त
मेषाञ्जम्भे दध्मः २४ अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ विश्वाची
च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्वि।
ष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः २५ अयमुपरि अयमुपर्य्यर्वाग्वसुस्तस्य सेनजिच्च सुषेण

CC-0 In Public Domain. Digitzed by eGangotri

सेनानीग्रामण्यौ उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन्हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमोऽस्तु ते नो
ऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः १९ मंत्रोक्ता ऋषयः स्पष्टं ता ॐ अथ व
ंशः समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः ॥
कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कु
श्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजा
पतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः १ **वंशोक्ता** ऋषयः स्पष्टं ता १ अथ वंशः
तदिदं वयं शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पा
राशर्यः सांकृत्याच्च भारद्वाजाच्च भारद्वाज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौत
मो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रै
भ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौ
ण्डिन्यात् कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च २ **आग्निवेश्यः** सैतवात्सैतवः पाराशर्यात्परा
शर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वा
जाद्भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौ
शिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भार
द्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौप

CC-0 In Public Domain. Digitized by eGangotri

जत्य निरास्थेरासर्विभर्भारद्वाजाद्भारद्वाज आत्रेयात् ३ **आत्रेयो** मांटेर्मांटिर्गौतमाद्गौतमो गौ
तमाद्गौतमो वात्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्
कुमारहारितो गालवाद्गालवो विदर्भी कौण्डिन्याद्विदर्भी कौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपा
द्बाभ्रवः पंथः सौभरात्पन्थाः सौभरो ऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वा
ष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दै
वादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचि
त्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमे
ष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः **वंशो ब्राह्मणं षष्ठं समाप्तं** ४ अथ वंशस्त्विदं वय
वैशौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यः पाराशार्य्याच्च पाराशार्य्यः सांकृ
त्याच्च भारद्वाजाच्च भारद्वाज औदवाहेः शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वै
जवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्च जैव
न्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौण्डि
न्यावौर्णवाभेभ्य और्णवाभाः कौंडिन्यात् कौंडिन्यः कौंडिन्यात्कौंडिन्यः कौंडिन्यादाग्निवेश्याच्च २१
आग्निवेश्यः सैतवात्सैतवः पाराशार्य्यात्पाराशार्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वा
जो भारद्वाजाच्चासुरायणाच्च गौतमाद्गौतमो भारद्वाजाद्भारद्वाजो वलाकाकौशिकाद्बलाकाकौशिकः का

CC-0 In Public Domain. Digitzed by eGangotri

५८ शायनात्काषायणात्सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकाय
नात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पा
राशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वा
जाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भार
द्वाजाद्भारद्वाज आत्रेयात् २ आत्रेयो आत्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो
वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात् कैशोर्यः काप्यः कुमारहरितात्कुमार
हरितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः प
थः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्व
रूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाद
थर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्ते
र्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः पर
मेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ३ [illegible] अथ वंशः तदि
दं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पा
राशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात् पाराशरीकौण्डिनीपुत्रो गार्गीपु
त्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो वाडेयीपुत्राद्वाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो हारि

CC-0 In Public Domain. Digitzed by eGangotri

कार्शकेयीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौ-
नकीपुत्रः १ काश्यपी बालाक्या माठरीपुत्रात्काश्यपी बालाक्या माठरीपुत्रः कौत्सीपुत्रात्कौ ॥
त्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणी-
पुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्रा-
द्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वा-
र्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः साङ्कृतीपुत्रात्साङ्कृतीपु-
त्रः २ आलम्बीपुत्रादालम्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्ती-
पुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो
राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रो भालु-
कीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्साञ्जीवीपुत्रः कार्शकेयी-
पुत्रात्कार्शकेयीपुत्रः ३ प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र आसुरायणादासुराय-
ण आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कु-
श्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्वार्षगणादसि-
तो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रु-
वेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाज-

CC-0 In Public Domain. Digitzed by eGangotri

स्तेयेन याज्ञवल्क्येनाख्यायते ४ **वंशोक्ता ऋषयस्तर्पणे** इमावेव गोतमभरद्वाजाव
यमेव गोतमोयं भारद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोयं जमदग्निरिमावेव
वसिष्ठकश्यपावयमेव वसिष्ठोयं काश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यते निर्ह वै नामैतद्यदत्रिरि
ति सर्वस्यात्ता भवति सर्वस्यान्नं भवति य एवं वेद १ ब्राह्मणोक्ता **ऋषयस्तर्पणे आचार्यो**
शिक्षा अयं त्वरस्त्यादि मावेत्यन्तैर्मंत्रब्राह्मणोक्तर्पणं समापयेद्गुरिति पौषमासस्य रोहिण्या
मित्यत्र प्रयोगावसरे वासुदेवप्रभृतिनिबन्धकारा जीवत्पितृकस्य मातामहादितर्पणमालि
खितवन्तस्तदसमञ्जसम् वस्तुतस्तु यद्वा पित्रादितर्पणे जीवत्पितृकस्य नाधिकारः प्रतीया
ते तद्वन्मातामहादितर्पणेप्यनधिकार एव पित्राज्ञां जीवत्पितुर्नोक्तमिति **निगमवाक्यात्** ।
न पित्राज्ञी जीवत्पितृकः प्रकुर्वीत कदाचनेति **वृद्धगार्ग्यमपि** कात्यायनः सपितुः पितृकृ
त्येषु अधिकारो न विद्यते न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतिः पितृकृत्यानि श्राद्धतर्प
णस्वधाकारपितृयज्ञस्थर्थे दानानीति व्याख्यानं जीवत्पितृकस्य च येन तथा अन्वास्वेतर इति स्वसू
त्रेपि मृतपितृकस्यैव पित्रादितर्पणं सूत्रकारेण प्रदर्शितं महानदीषु सर्वासु तीर्थेषु च गया
यां मृते जीवत्पितापि कुर्वीत श्राद्धं पार्वणाथ मेवदिति वचनातिप्रसवोप्युक्तं ते यत्र प्रतिप्रसवस्त
त्र भवति यथा जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति अन्येपि दोषाः अत्र जीवत्पितृक
निर्णये सन्ति परन्तु ग्रन्थगौरवभयान्न लिखिताः एवं ऋषितर्पणं विधायाचार्यो शिक्षा ओंकार

CC-0 In Public Domain. Digitzed by eGangotri

व्याहृतिपूर्वां सावित्रीं चतुरः पठेयुः तत्र सूत्रं सावित्रीं चतुरनुद्रुत्येति सूत्रार्थः सा च यथा सावित्रीं चतुरः पठेयुः उक्ता
र्थं सूत्रे सावित्रीं च तस्रवद्रुत्येति स्पष्टं ननिर्देशेन सावित्रीपठनाव्यवहितकाले विरतास्मेति पठनं यद्यपि श्रुते
तथाप्युत्तरसूत्रे प्रवचनेन च पूर्ववदित्युक्तेस्तत्र यथा प्रवचने दृष्टं तथा च कर्तव्यं तेन सावित्रीपठनानन्तरमेव
वाध्यायादीन् ब्रूयुः स्वदन्ते विरताः स्मइति पठेयुरिति सिद्धं विरतोऽनन्तरं पठनाभावात् तथा च कारिकाधीयाः पठे
युरिति सिद्धं विरतोऽनन्तरं पठनाभावात् तथा च कारिकाधीयाः पठेयुः सावित्रीं चतुः कृत्वोऽग्र
तः स्वयं उपाकृतिवत्सर्वांश्च प्रतावेयोजयेत्कवि १० सावित्रीं त्रिः समुद्रायं व्याध्यायांश्च प्रपाठ
कान् प्रातस्थानान्यनुस्मृत्य काण्डिकाश्च तथाग्निमा ११ अग्निमाःकण्डिका ब्रूयादग्निमीलेपु
रोहितम् इषेत्वेत्यग्नआयाहि शन्नोदेवीरभिष्टये १२ सहनोस्त्विति मन्त्रं च पश्चादुभाकवीति
च ऋषिश्राद्धं ततः कृत्वा ब्राह्मणानां विसर्जनं १३ **कारिकार्थः** प्राङ्मुखोऽग्रतः स्वयं ओंकारा
पूर्विकां सावित्रीं चतुः पठेत् प्रत्यङ्मुखोपविष्टाः शिष्यास्तदनु पठेयुः सावित्रीपठनोत्तरम
ध्यायप्रपाठकप्रातोत्यकंडिकोत्यकण्डिकाप्रतीकानि पठेयुः न त्वाचारमूले प्रतीकपठनं
किन्त्वध्यायादीन् प्रब्रूयादिति सूत्रे आदिग्रहणस्य प्रतीकोपादानं व्याख्यातृभिर्व्याख्यातं युग
पत्सर्ववेदोत्सर्गपक्षे ऋग्वेदोक्तान्यग्निमीळेत्यादीनि सामवेदोक्तानि पर्वाण्यथर्ववेदोक्तानि स्वो
क्तानि पठेयुः तत्र सूत्रं तर्पणं प्रवचनेन च पूर्ववत् उपाकर्मवदित्यर्थः अथाध्ययनक्रमः
प्राङ्मुखोपविष्टो गुरुः ओंकारपूर्वां सावित्रीं त्रिः पठित्वा प्रत्यङ्मुखोपविष्टः शिष्येभ्यो मन्त्रब्राह्म

CC-0 In Public Domain. Digitzed by eGangotri

णमेवाध्यायादीन् पाठयेत् शिष्यायथोक्तमध्यायादीनधीयीरन् ॐभूर्भुवःस्वःतत्सवितुर्यात्
इषेत्वा १ कृष्णोसि २ समिधाग्निम् ३ दंस ४ अग्नेत्वन्नः ५ देवस्यत्वा ६ वाचस्पतये ७ उपा
यामगृहीतोसि ८ देवसवितः ९ अपोदेवाः १० युञ्जानःप्रथमम् ११ दृशानोरुक्मः १२ मयि
गृह्णामि १३ ध्रुवक्षितिर्ध्रुवयोनिः १४ अग्नेजातान् १५ नमस्ते १६ अश्मन्नूर्जम् १७ वाजश्च
१८ स्वाद्वींत्वा १९ क्षत्रस्ययोनिः २० इमम्मे २१ तेजोसि २२ हिरण्यगर्भःसम् २३ अश्वस्तूपरः।
२४ शादन्दद्भिः २५ अग्निश्च २६ समास्त्वा २७ होतायक्षत् २८ समिद्धोअञ्जन् २९ देवसवि
तः ३० सहस्रशीर्षापुरुषः ३१ तदेव ३२ अस्याजरासः ३३ यज्जाग्रतः ३४ अपेतः ३५ ऋचंवा
चम् ३६ देवस्यत्वा ३७ देवस्य ३८ स्वाहाप्राणेभ्यः ३९ ईशावास्यम् ४० इतिसंहिताध्यायाः।
अथप्रातानिइषेत्वा १ पवित्रे २ अग्नेनयः ३ उपयामगृहीतोसिसुशर्म्मासि ४ प्रथमावा
म् ५ सोमस्यत्विषिः ६ परस्याअधि ७ अग्नावः ८ रात्तसि ९ नमोहिरण्यवाहवे १० इन्द्रो
मम् ११ इमौते १२ अन्नात्परिस्रुतः १३ अश्विनातेजसा १४ पृथिव्यैस्वाहा १५ प्रजापतयेच १६
तेऽग्नस्य १७ तनूनपात्पथः १८ अयमिह १९ अग्नेनः २० इयत्यग्रे २१ हिरण्मयेनपात्रंपचसा
नतिः २५ कण्डिकाः व्रतमुपैष्यन् १ सर्वैकपालान्येवान्यतर उपदधाति २ सर्वैस्रुचःसंमा
र्ष्टि ३ दिक्कृत्यान्वाह ४ सर्वैप्रवरायाश्रावयति ५ ऋतवोहवै देवेषुयज्ञेभागमीषिरे ६ स
वैपर्णशाखयावत्सानपाकरोति ७ मनवेहवैप्रातः ८ सयत्राह ९ सम्यत्स्यहाउतश्चैतस्य

CC-0 In Public Domain. Digitzed by eGangotri

सम्भरति १० उद्धृत्याहवनीयमगार्हपत्ये जुहोति ११ सूर्यो देवा अग्निहोत्रं १२ अथ यद्धुतेऽग्निहोत्र उपतिष्ठ
ते १३ प्रजापतिर्ह वा इदमग्र एक एवास १४ महाहविषा ह वै देवा वृत्रं जघ्नुः १५ देवयजनं ।
जोषयन्ते १६ दक्षिणेनाहवनीयं प्राचीनग्रीवं कृष्णाजिने उपस्तृणाति १७ सप्त पदान्यनुनिक्रा
मति १८ शिरो वै यज्ञस्यातिथ्यं बहुप्रायणीयोदयनीयौ १९ तद्यदेव पूर्वार्ध्यो वर्षिष्ठः स्थूणारा
जो भवति २० उदरमेवास्य सदः २१ अग्निमादत्ते २२ तद्यत्रैतत्प्रचरन्तो होता होत्रषदन उपविश
ति २३ प्रजापतिर्वै प्रजाः ससृजानो रिरिचान इवामन्यत २४ प्राणो ह वा अस्योपांशुः २५ चक्षु
षी ह वा अस्य शुक्रामन्थिनौ २६ भक्षयित्वास्रुपहूताः स्कन्दस्त्रकोतिष्ठति २७ मनो ह वा अस्य सवि
ता २८ आदित्येन चरुणोदयनीयेन प्रचरति २९ प्रजापतिर्वा एष यदंशुः ३० देवाश्च वा असु
राश्च ३१ अथ स्रुवं चाज्यविलापनीं चादाय ३२ अरण्योरग्नी समारोह्य ३३ केशवस्य ग्रहस्य
३४ अग्नयेऽष्टाकपालः पुरोडाशो भवति ३५ असद्वा इदमग्र आसीत् ३६ प्रजापतिरग्निरूपाण्य
भ्यध्यायत् ३७ एतद्वै देवा अब्रुवन् ३८ अथैनमतः खनत्येव ३९ पर्णकषायनिष्पक्वा एता आ
पो भवन्ति ४० भूयांसि हवींषि भवन्ति ४१ सकामप्रतिमुच्य बिभर्ति ४२ वनीवाह्यते नाग्निं
विभ्रद्दित्याहुः ४३ गार्हपत्यं चेष्यन् पलाशशाखया व्युदूहति ४४ अथातो निर्ऋतीर्हरन्ति ४५
चितो गार्हपत्यो भवति ४६ आत्मन्नग्निं गृह्णीते चेष्यन् ४७ कूर्ममुपदधाति ४८ प्राणभृत
उपदधाति ४९ द्वितीयां चितिमुपदधाति ५० तृतीयां चितिमुपदधाति ५१ चतुर्थीं चितिमुपद

CC-0 In Public Domain. Digitized by eGangotri

याति ५२ पञ्चमीं चितिमुपदधाति ५३ नाकसद उपदधाति ५४ ऋतव्या उपदधाति ५५ अथातः शा
तरुद्रियं जुहोति ५६ उपवसथीयेऽहन् प्रातरुदित आदित्ये ५७ अथातो वैश्वानरं जुहोति ५८
अथातो राष्ट्रभृतो जुहोति ५९ अथातः पयोव्रततायै ६० अग्निरेष पुरस्ताच्चीयते ६१ प्रजाप
तिः स्वर्गं लोकमजिगांसत् ६२ प्राणो गायत्री ६३ प्रजापतिं विस्रस्तम् ६४ तस्य वा एतस्या
ग्नेः ६५ अथ हैते कृत्ती ६६ संवत्सरो वै यज्ञः प्रजापतिः ६७ त्रिर्ह वै पुरुषो जायते ६८ प्राग्व
वा एतस्याग्निहोत्रस्याग्निहोत्री ६९ उद्दालको हारुणिः ७० उर्वशी हाप्सराः ७१ भृगुर्ह वै वारु
णिः ७२ पशुबन्धेन यजते ७३ न यथा ह वै ७४ अथ वै यज्ञो योऽयं पवते ७५ समुद्रं वा एते प्र
तरन्ति ७६ यद्वा लोके ७७ दीर्घसत्रं ह वा एत उपयन्ति ७८ तदाहुर्यद्देवदीर्घसत्री ७९
सोमो वै राजा यज्ञः प्रजापतिः ८० विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन् ८१ इन्द्रस्य वै यत्र ८२ एतस्मा
द्वै यज्ञात्पुरुषो जायते ८३ ब्रह्मौदनं पचति ८४ प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् ८५ प्र
जापतेरक्ष्यश्वयत् ८६ प्रजापतेरक्ष्यश्वयत् ८६ प्रजापतिरकामयत ८७ अथ ह ज्ञातगोतमस्य
८८ पुरुषो ह नारायणोऽकामयत ८९ ब्रह्म वै स्वयम्भु तपोऽतप्यत ९० अथास्मै श्मशानं कुर्व
न्ति ९१ देवा ह वै सत्रं निषेदुः ९२ अथातो रौहिणौ जुहोति ९३ स वै ल्तनीयेऽहन् ९४ द्वया
ह प्राजापत्याः ९५ दृप्तबालाकिर्हानूचानो गार्ग्य आस ९६ जनको ह वैदेहः ९७ जनकं ह
वैदेहं याज्ञवल्क्यो जगाम ९८ पूर्णमदः पूर्णमिदं ९९ श्वेतकेतुर्ह वा आरुणेयः १०० अथ

CC-0 In Public Domain. Digitzed by eGangotri

५५ प्रपाठकाः व्रतमुपैष्यन् १ वर्तह्वीविहितोदृवा अग्नेशिरास २ देवाश्चार्द्राःस्युः ३ ससवोनरमाथा
रमाचारयिष्यन् ४ यज्ञेनवैदेवाः ५ यज्ञेनवैदेवादिवमपोदक्रामन् ६ सवैस्कचौकृदति ७
सयद्वाइनश्चेतश्चसम्भरति ८ वरुणोहैनद्राज्यकाममादधे ९ अत्रवैप्रजापतिःप्रजाःससृजे।
१० प्रजापतिर्देवाएतेनाग्रेयज्ञेनजे ११ महाहविःप्राहवैदे वाद्धंत्रेजज्ञुः १२ देवयजनंजोषया।
न्ते १३ वाचंयच्छति १४ नीडेकृष्णाजिनमास्तृणाति १५ तयपद्दपूर्वोध्योत्तर्पिष्ठस्थूणाराजोभ
वति १६ विजामामोहैवास्यपियस्याः १७ पाशंकृत्वाप्रतिमुञ्चति १८ सोत्तरपयजति १९ प्रा
णोदवाअस्यापाथंस्याः २० आत्मादवाअस्यात्रयणाः २१ अग्निर्वाएतस्ययज्ञम् २२ सवाअवस्थ
थमभ्यवैति २३ तयत्रै तद्दादशाहेनव्यूढच्छन्दसायजते २४ देवाश्चअसुराश्च २५ वार्द्दस्प
त्येनवरुणाप्रचरति २६ सवाअपःसम्भरति २७ मैत्रावरुण्यापयस्ययाप्रचरति २८ असद्वा
इदम् अग्रआसीत् २९ प्रजापत्यञ्चरुङ्गालभते ३० यदीप्राणनेग्नयोभवन्ति ३१ तस्यापतस्या
आषाढांपूर्वांकरोति ३२ रुक्मंप्रतिमुच्यविभर्ति ३३ गार्हपत्यञ्चेष्यन् पलाशशाखायाश्च
ह्रहति ३४ अथदर्भस्तम्बमुपदधाति ३५ आत्मन्नग्निंगृह्णीतेचेष्यन् ३६ कूर्ममुपदधाति
३७ शालाद्बतउपदधाति ३८ अथविश्वज्योतिषमुपदधाति ३९ अथातोन्वाहृतम् ४० गार्हपा
त्यमुपदधाति ४१ अथातःशतरुद्रियंजुहोति ४२ अभ्येत्याग्निंप्रहरिष्यन् ४३ अथैतान्यज्ञक्रा
तूंजुहोति ४५ अथप्रातः प्रातरनुवाकमुपाकरिष्यन् ४६ अग्निरेषपुरस्ताच्चीयते ४७ अथा

CC-0 In Public Domain. Digitzed by eGangotri

५८ तस्माद्यानस्यैव ४८ संवत्सरो वै प्रजापतिरग्निः ४९ नेव वा इदमग्रेऽसदासीन्नेव सदासीत् ५० संवत्स
रो वै यज्ञः प्रजापतिः ५१ अपि ह वा एतर्हि ५२ प्रजापतिर्वै प्रजाः सृजमानोऽतप्यत ५३ अथातः स्वा
ध्यायप्रशंसा ५४ अयं वै यज्ञो योऽयं पवते ५५ पुरुषँ ह नारायणं प्रजापतिरुवाच ५६ सो
मो वै राजा यज्ञः प्रजापतिः ५७ प्रजापतिर्यज्ञमसृजत ५८ ब्रह्मौदनं पचति ५९ नियुक्तेषु पशु
षु ६० पशुव्याख्यं दक्षिणेन वेदिं ६१ पुरुषो ह नारायणोऽकामयत ६२ देवा ह वै सत्रं निषेदुः ६३
सर्वैत्रेताँ होतान्वाह ६४ द्वया ह प्राजापत्याः ६५ दृप्तबालाकिर्हानूचानो गार्ग्य आस ६६ अ
थ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ६७ जनकं ह वैदेहं याज्ञवल्क्यो जगाम ६८ भूमिरन्तरिक्षं
द्यौरिति ६९ अथ व्रतस्थानानि व्रतमुपैष्यन् १ तद्यदेवं पिनष्टि २ अथाज्यलिप्ताभ्यां पवित्रा
भ्यां ३ बृहच्छोचा यविष्ठ्येति ४ वसूनां रातौ स्याम ५ अग्निर्वै देवानामद्धातमो ६ तद्यथा
योनौ रेतः सिञ्चेत् ७ तावेवाग्नीत्येव ८ अथ वेदं पत्नीं विस्रंसयति ९ अयं वै यज्ञो योऽयं पवते १०
अथ यदस्तमेति ११ रेवतीरमध्वमिति १२ स वा आग्नेयोऽष्टाकपालः पुरोडाशो भवति १३ तद्येषा
मेनेजानाः १४ अथो नवे त्वा शालां परिश्रयन्ति १५ अथोपलिखति १६ सा यावदस्रः पिङ्गाक्षी सा
सामक्रयणी स्यात् १७ ते देवाः १८ इडयोपाः प्रोक्ता गौरवध्यं वदन्ते १९ सदाकद्रूरुवाच २०
तद्यपत उच्छ्रिता देवा ह वै यज्ञं तन्वानाः २१ अथ पार्श्वेन वासिना वा प्रयौति २२ यज्ञो दातिष्ठा
णो वह्निः समिधा हवं मह्यति २३ इयं ह वा उपांशुः २४ तस्मा असावेव कृष्णव्रात्यः २५ यज्ञा

द्यावापृथिव्यौ ह वाऽस्यै ते २६ सम्राज्यस्यापत्नीर्यद्दिश्वरोरवयति २७ इन्द्रो ह वै षोडशी २८ तासां
द्वादश गर्भाः २९ तयैतत्सप्तदशा वाजपेयेन यजते ३० अथ दीक्षोत्तवीत्तमाणो जपति ३१ स वै
दीक्षते ३२ अथैतमभिषेकम् ३३ षडेवान्तरे चरवः ३४ यथो आहुः ३५ मावास्यायां दीक्ष
ते ३६ अश्वस्य पदे जुहोति ३७ अथैनां धूपयति ३८ तस्य परिनामि विभर्त्ति ३९ अथोखां वा
वपति ४० चतस्रः सीता यजुषा कृषति ४१ तं प्रत्यञ्चं यन्ति ४२ अथ पाङ्क्तमसीदेति ४३ त
स्यमनो विश्वकर्मन्नामिति ४४ तयैषा मध्यमा स्वयमातृण्णा ४५ एकादशाभिरस्तवतेति
४६ तावापतादशोष्टका उपदधाति ४७ अथ स्वयमातृण्णमुपदधाति ४८ अथोत्तरार्धे
न प्राक् ४९ स यः स वैश्वानरः ५० यास्ते अग्ने सूर्ये रुचः ५१ नामकृत्वाथैनमुपतिष्ठते ५२
यावाड्इयं वेदिः सप्तविधस्य ५३ अयमेवाकाशो ज्ञः ५४ सोयमात्मा त्रेधाविहितएव ५५ ॥
अथ सर्वैष्णाः ५६ अथ यामेतामाहुतिं जुहोति ५७ अथ यदत्र वाक्यामनूच्य ५८ ब्रह्मा
चार्ये सीत्याह ५९ स यत्पशुबन्धेन यजते ६० दशाति होवाच ६१ अथ यत्र स्कन्नं स्यात् ६२
अथ यदि प्रसूतः ६३ सर्व अष्टिना भवन्ति ६४ प्रजापतिर्यज्ञमसृजत ६५ किं वाव पनेमद
दिति ६६ अथ योस्य निष्कः प्रतिमुक्तो भवति ६७ एतेन ह स्मेन्द्रोतो देवापः शौनकः ६८ चतस्रः
सीता यजुषा कृषति ६९ अथान्तरतः सिकता उपकीर्णा भवन्ति ७० अथ योद्दिग्गोऽग्न होति ७१
ते देवा अब्रुवन् ७२ तानि यदा स्तृणाति ७३ योग्नौ तिष्ठन् ७४ कतम आत्मेति ७५ अथैतेन

CC-0 In Public Domain. Digitzed by eGangotri

मनुष्याऋत्वः १८ अथयामिष्ट्वेन्द्रभन्दधीतेति ११ समसमस्त्वयनिषत्स्थानाति अथव्रतंविसृ
जते १ सयस्मिंदर्शोवक्षुल्लोकमेति २ अथनिशायोग्रस्थान्विरहन्नाते ३ अथयदहपतिःसब्र
ह्मणामान्नायाति ४ तावापताः ५ तानिदशाभवति ६ ताऽपताऽअङ्गुलयः ७ मध्यमेवत्र
तीयाविति: ८ सहोवाच ९ अथवरेंधाः १० तस्माऽउदैतऽउवाच ११ सवाएषआत्मैवयन्मा
त्रामणी १२ मर्यादायापवलोष्टमाहृत्य १३ प्राश्नीयुग्रादाहरिवासिनः १४ एवव्रतंविसृजे
त् १ परमांगतिङ्गच्छतीति २ तस्माद्धोत्वचमसात् ३ तस्मिन्नस्युपदवसिष्ठासामियोस्योदय
ति ४ द्वादशावात्रयोदशावादक्षिणाभवन्ति ५ यावानग्निर्यावत्यस्यमात्रातावन्नुद्रवति ६ ता
स्मात्समानसम्बन्यता ७ तस्मादिमेप्राणाऽउपरिष्टादसञ्छन्नाः ८ संवादेनैवविजोलोकइति ९
ब्रह्मणोब्रह्मस्वयम्भ्वब्रह्मणेनमः १० कौशिनीरेवेमाश्चाप्येतर्हिप्रजाजायंते ११ तस्माद्धिमावा
क्मानमभितोवाहू १२ तस्माऽउदैतजीवाश्चापितरश्चनसंदृश्यन्ते १३ वाजसनेयेनयाज्ञवल्क्ये
नाव्याख्यायन्ते १४ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमं इषेत्वोर्जेत्वा
॰याहि २ अग्नआयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषि ३ शन्नोदेवीरभि
ष्टयेआपोभवन्तुपीतये शंयोरभिस्रवन्तुनः ४ इत्यध्ययनेसमाप्तं अथऋषिश्राद्ध
मुपक्रम्यते तत्रायंप्रकारः कृतस्नानयामोदेशकालौसंकीर्त्यऽन्यमार्गकुर्भूते ऋषिश्राद्धम
हङ्करिष्ये ओंइदंविस्मरितिदिग्बन्धः ऋषिश्राद्धोपहताःशुचयोभवन्तिवसुपदहारप्रोक्तांदेशा

CC-0 In Public Domain. Digitzed by eGangotri

कालपात्रद्रव्यश्रद्धासम्पदस्तु गोतमादिसप्तऋषीणामिदमासनं यथायथाविभागंवःस्वाहा
गोतमादयःसप्तऋषयोयथादत्तं गंधाद्यर्चनं यथाविभागंवःस्वाहा गन्धादिदानं ऋषिश्राद्ध
साङ्गतासिध्यर्थं सप्तसंख्यकान् ब्राह्मणान् यथाकालेयथासम्पन्नान्नेनतर्पयिष्ये तेनगोत
मादयः सप्तऋषयःप्रीयन्तां ऋषिश्राद्धसांगतासिध्यर्थंद्रव्यनिष्क्रयभूतांदक्षिणां मन
सोद्दिष्टामाचार्याय सम्प्रददे आचार्यः कोदादिति कामस्तुतिंपठेत् ॐकोदात्कस्माऽअदात्का
मोदात्कामायदात् कामोदाताकामः प्रतिग्रहीताकामैतत्ते १ उपविष्टेषुब्राह्मणेषूदका
दिदानं तद्यथा ॐशिवाआपःसन्तु ॐसौमनस्यमस्तु अक्षतञ्चारिष्टंचास्तु अघोराःऋषयःसन्तु
सर्वत्रसन्त्विति विप्राःप्रतिवचनंदद्युः उत्सर्गकर्मणोन्यूनातिरिक्तादोषपरिहारार्थं नानागो
त्रेभ्यो नानाशर्मभ्योविप्रेभ्योभूयसींदक्षिणांसम्प्रददे अद्येत्यादिगुणविशिष्टे काले देशे
च कृतैतदमुकसर्गाङ्गभूतऋषिश्राद्धं परिपूर्णमस्तु अस्तुपरिपूर्णमितिविप्राः प्रतिवचनंद
द्युः ततःसहनावस्तु सहनोस्तु सहनोवतु सहन इदंवीर्यवदस्तु ब्रह्म इंद्रस्तद्वेदयेनयथान
विद्विषामहे इतिउभाकवीत्यस्य प्रजापतिऋषिः अश्विनौदेवते जपेविनियोगः उभाकवीयु
वायोनोधर्मः परापतत् परिसख्यस्यधर्मिणोविसख्यानिविसृजामहेइतिच सर्वेजपेयुः।
विरतास्मेति प्रब्रूयुः ततोऋषीन्विसर्जयेत् तत्ररेणुकारिका ततोविसर्जनं कुर्युरुत्तिष्ठ।
ब्रह्मणस्पतइति उत्तिष्ठेतियोरकएवऋषिर्बृहतीछन्दः ब्रह्मणस्पतइति उत्तिष्ठेतिचोरका।

CC-0 In Public Domain. Digitzed by eGangotri

९. एवऋषिर्बृहतीछन्दः ब्रह्मणस्पतिर्देवता सप्तर्षिविसर्जनेविनियोगः ॐउत्तिष्ठब्रह्मणस्पतेदे
वयन्तस्त्वेमहे उपप्रयन्तुमरुतः सुदानवः इन्द्रप्राशूर्भवासचा १ ततःसमाचारात्समुद्रंग
च्छेति सप्तर्षीन्जयाप्राप्येप्लावयेत् ॐसमुद्रंगच्छस्वाहान्तरिक्षंगच्छस्वाहादेवंठ ॥
॥ ॥ सवितारंगच्छस्वाहा मित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाछन्दांसि
गच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञंगच्छस्वाहासोमंगच्छस्वाहादिव्यन्नभोगच्छस्वा
हाग्निंवैश्वानरंगच्छस्वाहा मनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः पृथिवीम्भस्मना॥
पृणस्वाहा स्वस्वप्रवरान्विसर्जयेत् एवमुत्सर्गंविधायत्रिरात्रमनध्यायः सर्वैःशिष्यानिवसे
युः तत्रसूत्रं त्रिरात्रंठ सहोष्यविप्रतिष्ठेरन्निति सूत्रार्थः ततःसर्वेगुरुगृहेत्रिरात्रमुषित्वा
स्वस्वगृहं गच्छेयुः अन्यच्च त्रिरात्रं नाधीयीरंल्लोमनखानामनिकृन्तनञ्च सूत्रार्थः उत्सर्गा
नंतरं त्रिरात्रमध्ययनंनकुर्युः तथानखलोम्नांनिकृन्तनञ्च एकेप्रागुत्सर्गात् एवंप्रकारेणो
दगुत्सर्गाख्यंकर्मप्रतिवर्षमनुष्ठेयं नित्यत्वात् तथाचकात्यायनः प्रत्यब्दंयदुपाकर्मसोत्स
र्गं विधिवद्द्विजैः क्रियतेछन्दसांतेनपुनराप्यायनंभवेत् १ अस्यानोच्छासविच्छेदपोष।
णाप्यायनादिकं कृतोयत्नस्यायतयामत्वकारितत् २ अयातयामैश्छन्दोभिर्यत्कर्मक्रिय
तेद्विजैः क्रीडमानैरपिसदातत्तेषांसिद्धिकारकमिति ३ उत्सर्गोत्तरंपुनरुपाकरणंयाव
शुक्लकृष्णव्यवस्थयामन्त्रब्राह्मणयोरध्ययनं अङ्गानांच तदुक्तंमितान्तरायां यथाशास्त्र।

CC-0 In Public Domain. Digitzed by eGangotri

८१ त्वा कृत्वैवमुत्सर्गं छन्दसांबहिः विरमेत्पक्षिणीं रात्रीं यद्वाप्येकमहर्निशामिति अतऊर्ध्वंतु छन्दांसि
शुक्लेषुनियतःपठेत् वेदाङ्गानितुसर्वाणिकृष्णपक्षेषुसम्पठेदिति तत्रशुक्लेषुछन्दांसि कृष्ण
पक्षेष्वङ्गानीतिविवेकः समूलत्वादयमेवपक्षः श्रेयस्करः वनस्थोपीदंकुर्वीत तदुक्तं प्र
योगपारिजाते उपाकर्मोत्सर्जनञ्च वनस्थानामपीष्यते धारणाध्ययनाङ्गत्वाद्गृहिणां ब्रह्म
चारिणामिति उत्सर्गाकरणेदोषःश्रूयते उत्सर्जनञ्चवेदानामुपाकर्मतथैवच अकृत्वावेदा
जाप्येनफलमाप्नोतिमानवः सूत्रकारिकयोर्भाष्यंविलोक्यपद्धतिःकृता कर्मवन्तांप्रबोधाय
कान्हदेवद्विजन्मना

इतिश्रीमन्महाराजाधिराजरणवीरसिंहभू
पालाज्ञप्तजनार्दनसंगृहीतपारस्करसूत्रा
नुसारीपद्धतिः समाप्तिमगमत् ॥ ॐ ।

CC-0 In Public Domain. Digitized by eGangotri

ॐ श्रीगणेशाय नमः अथातोऽध्यायोपाकर्म अध्ययनमध्यायः तस्योपाकर्म स्वी
कारः इति सूत्रशेषः एतच्चकृतावसथ्यस्याध्यापनप्रवृत्तस्य भवति अपरेत्व अध्यापनप्रवृत्त
स्यानिरग्नेरपि लौकिकाग्नौ भवतीत्याहुः अनौपासनिकस्योपाध्यायस्यायमेव विशेषो लौ
किकाग्नाविति गर्गपद्धतौ हरिहरभाष्येपि छन्दोगपरिशिष्टे कात्यायनः नखेग्नावन्यहोमः
स्यान्मुक्त्वैकां समिदाहुतिम् स्वगर्भसंस्क्रियार्थाश्च यावन्नासौ प्रजायतऽइति तेनावसथ्याभा
वुपाकर्म भवतीति गम्यते तेनाध्यापयतोपि निरग्नेः साग्नेरनध्यापयतोनाधिकारः यत्तु लोके
ब्रह्मचारिणा अरहस्कृतस्य उपाकर्म प्रवर्तते लौकिकाग्नौ तस्याचारं विदाय मूलं न दृश्यते अत्र पूर्व
जानां शिष्टाचारमङ्गीकृत्य कर्तव्यं अस्य लोपो न कर्तव्यः अथातोध्यायोपाकर्म प्रयोगः पा
दौ प्रक्षाल्य द्विराचमनं अवसथ्याग्नेः पश्चात्पल्याशिष्यैः सह प्राङ्मुख उपविश्य आवसथ्ये।
त्वेर्परमथित्वेत्यत्र यवान् प्रतिष्ठ त्वेर्परस्याथः प्रज्वाल्य यवानां भर्जनं ते यवाधानाः आव
सथ्याभावे गृह्योदिविधिना सिद्धाग्नेः पश्चादित्यादि तदभावे ग्राम्याग्निस्थापनं तद्यथा अथ
तिथौ अध्यायोपाकर्मणि पंचभूसंस्कारपूर्वकमग्निस्थापनमहं करिष्ये दर्भैः परिसमूह्य
गोमयोदकेनोपलिप्य स्रुवेणोल्लिख्य अनामिकाङ्गुष्ठेनोद्धृत्य उदकेनाभ्युक्ष्य अग्निमुपसमा
धाय अग्नेः पश्चात्पत्न्याशिष्यैः सह प्राङ्मुख उपविश्य अग्नेः त्वेर्परमथित्वेत्यत्र यवान् प्र
तिष्ठ त्वेर्परस्याथः प्रज्वाल्य यवानां भर्जनं ते यवाधानाः ग्रहः प्राणायाम त्र्यं कालज्ञानं क

CC-0 In Public Domain. Digitzed by eGangotri

६६ कृत्वा श्रीपरमेश्वरप्रीतये अध्यायोपाकर्माहं करिष्ये वैकल्पिकपदार्थविचारणां कुर्यात् तत्र
पौर्णमास्यां सर्पकर्म पूर्वं वा ब्रह्मणो वरणं अग्नेरुत्तरतः पात्रासादनं द्वे पवित्रे ताम्रमयी आज्य
स्थाली पालाशः समिधः प्राञ्चावाघारौ समिद्धतमे आज्यभागौ तिलहोमः सावित्री मन्त्रेण पू
र्णपात्रं दक्षिणा त्रिरात्रं लोमनखानामनिकृन्तनं एतान्वैकल्पिकपदार्थानहं करिष्ये ऋ
षिच्छन्दोदेवतास्मरणं इषे त्वेत्यादिकस्य खं ब्रह्मान्तस्य माध्यन्दिनीयस्य वाजसनेयकस्य यजु
र्वेदाम्नायस्य विवस्वान् ऋषिः वायुर्देवता गायत्र्यादीनि सर्वाणि छन्दांसि अध्यायोपाकर्म
णि विनियोगः देवताभिध्यानम् तत्र प्रजापतिं इन्द्रम् अग्निम् सोमम् पृथिवीं अग्निं वरु
णं छन्दांसि अन्तरिक्षं वायुं ब्रह्माणं छन्दांसि दिवं सूर्यं ब्रह्माणं छन्दांसि दिशः च
न्द्रमसं ब्रह्माणं छन्दांसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां सदसस्पतिं अनुमतिं एताः
प्रधानदेवता आज्येन सदसस्पतिं धानाभिः सवितारं तिलैः अग्निं स्विष्टकृतमन्यानाघोषेण अ
ग्निं वायुं सूर्यं अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान् मरुतः स्वर्कान् वरुणं
प्रजापतिं एता अङ्गप्रधानार्था देवता अस्मिन्कर्मण्यहं यक्ष्ये दक्षिणतो ब्रह्मासनमास्तीर्य देवद
त्तशर्मन् कर्मणि त्वं ब्रह्मा भव भवामीति प्रतिवचनं इति ब्रह्मवरणं ब्रह्मावृतो आसनावलोकने
आसनात्तृणानि रसनं च कृत्वा उपविशेत् अग्नेरुत्तरतः प्रणीतार्थमासनद्वयं निधाय प्रणीता
चमसं वामहस्ते कृत्वा आत्माभिमुखं जलेनापूर्य पश्चिमासने निधाय चमसदक्ष मालभ्य ब्रह्मा

CC-0 In Public Domain. Digitzed by eGangotri

णमवलोक्य तेन सङ्केतादिनाऽनुज्ञातः प्रणीय उत्तरासने निदध्यात् ततउदगग्रैः प्रागग्रैःकुशै
रग्निं परिस्तीर्य अर्थवदासाद्य अग्नेरुत्तरतः प्राक्संस्थमुदक्संस्थं वा पात्रासादनम् पवित्रच्छेद
नार्थं दर्भास्त्रयः पवित्रे द्वे प्रोक्षणीपात्रं आज्यस्थाली संमार्गकुशास्त्रिप्रभृतयः उपयमनकुशाः
सप्तप्रभृतयः समिधस्त्रिप्रभृतयः स्रुवः आज्यं धानाः पूर्णपात्रञ्च अर्थोपकल्पनीयानि प्र
तिशिष्यं नववनवसमिध आर्द्राः सपत्राश्चौदुम्बरस्य दधिमध्वार्थे लौकिका धानाः वाहुमात्रसेतुं
वरकाष्ठन्तिलस्थापनस्थाने सर्पफणाकारमाकार्षफलकं तिलाश्चेति पवित्रकरणं द्वयोरुपरि
त्रीणि निधाय द्विर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य सर्वानग्रपङ्क्त्वा अनामिकाङ्गुष्ठाभ्यां छित्वा तान्
उत्तरतः क्षिपेत् प्रोक्षणीपात्रं प्रणीतोत्तरतो निधाय प्रोक्षणीपात्रे पात्रान्तरेण प्रणीताद्भिरासा
सां प्रोक्षणं सपवित्रदक्षिणोत्तानेन पात्रप्रोक्षणं आज्यस्थाल्याः प्रोक्षणं संमार्गकुशानां प्रोक्ष
णं उपयमनकुशानां प्रोक्षणं समिधां प्रोक्षणं स्रुवस्य प्रोक्षणं आज्यस्य प्रोक्षणं धानानां प्रोक्ष
णं पूर्णपात्रस्य प्रोक्षणं प्रणीताग्नेर्मध्येऽसञ्चरे प्रोक्षणीं निधाय कुशोपग्रहेण आज्यस्थाल्या
माज्यनिर्वापः आज्याधिश्रयणं ततो ज्वलदुल्मुकेन पर्यग्निकरणं इतरथावृत्ति अर्धश्रितेस्रु
वं प्रताप्य संमार्गकुशैः संमृज्य अग्रैर्मूलाद्यारभ्याग्रपर्यन्तं मूलैरग्रादारभ्य मूलपर्यन्तं प्रणी
तोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणतो निदध्यात् आज्यमुद्वास्य उत्तरतो निधाय ततोऽग्नेः प
श्चिमतो निदध्यात् पवित्राभ्यामाज्यमुत्पूय प्रोक्षणीश्च पूर्ववदुत्पूय आज्यमवेक्ष्य अपद्रव्याणि

CC-0 In Public Domain. Digitzed by eGangotri

ऽनन्तरं उपयमनाकुशानादाय तिष्ठन् समिधोऽभ्याधाय प्रोक्षण्युदकशेषेण सपवित्रेण दक्षि-
णेशानमारभ्येशानपर्यन्तं प्रदक्षिणमग्निं पर्युक्ष्य इतरथावृत्तिः पवित्रयोः प्रणीतासु निधा-
नं सोपयद्धं सव्यहस्तस्रुवं तानेहृदि निधाय दक्षिणजान्वनिपातः ब्रह्मणान्वारब्धः दक्षिणह-
स्तेन स्रुवेणाहोमः मनसा ओं प्रजापतये स्वाहा इदं प्रजापतये न मम ततोऽन्ते स्रुवावशेषः
प्रोक्षणीपात्रे संस्रववधारणं ओं इन्द्राय स्वाहा इदं० ओं अग्नये स्वाहा इदं० ओं सोमाय स्वाहा इदं०
ऋग्वेदे ओं पृथिव्यै स्वाहा इदं० ओं अग्नये स्वाहा इदं० ओं ब्रह्मणे स्वाहा इदं० ओं छन्दोभ्यः स्वाहा
इदं० यजुर्वेदे ओं अन्तरिक्षाय स्वाहा इदं० ओं वायवे स्वाहा इदं० ओं ब्रह्मणे स्वाहा इदं० ओं
छन्दोभ्यः स्वाहा इदं० सामवेदे ओं दिवे स्वाहा इदं० सूर्याय० इदं० ब्रह्मणे० इदं० ओं छन्दो-
भ्यः० इदं० अथर्ववेदे ओं दिग्भ्यः० इदं० चन्द्रमसे० इदं० ब्रह्मणे इदं० छन्दोभ्यः० इदं०
प्रजापतये० इदं० देवेभ्यः इदं० ऋषिभ्यः इ इदं० श्रद्धायै० इदं० मेधायै० इदं० सदस-
स्पतये० इदं० अनुमतये० इदं० एताः समस्तविधान्याहुतय आज्येन ततः शोधितया नाभिधा-
रणे स्रुवेणाप्यानाअवदाय सदसस्पतिमद्भुतमित्यनेन मन्त्रेण जुहुयात् ओं सदसस्पतिमद्भु-
तं प्रियमिन्द्रस्य काम्यम् सनिं मेधामयासिषं स्वाहा इदं इमं मन्त्रं शुक्लयजुषः पठमाने प्रो-
क्ता अपि सहानुपठेयुः ततउदुंबरसमित्त्रितयमभिघार्य हस्ते गृहीत्वा उत्थाय पादस्पर्शक्षि-
हुन्नः तस्मा वित्तं० स्वाहा इदमग्नये न मम इत्याचार्य एकां समिधमादध्युः एवं मन्त्रेण हितं

CC-0 In Public Domain. Digitzed by eGangotri

२४ यात् अष्टतीयां ततः सर्वैरुपविष्टेषु आचार्यः पुनः स्रुवेणाधानाग्रबधाय द्वितीयां धानाहुतिं
पूर्ववत् इदं ततस्तिस्रो वराः समिधो हुतेनाभ्युज्य उत्थाय प्राङ्मुखोस्तिष्ठन् तत्सवितु० स्वा
हा इदमाचार्यपदं समिधो श्यामादध्युः एवं द्वितीयां तथा तृतीयां पुनराचार्ये धानाहुतिं जुहु
यात् इदं सद० मंत्रानुपठनाशिष्याणामपि समिधत्रयं पूर्ववज्जुहुयात् ब्रह्मचारी तु शिष्यो
प्यहरहरग्निकार्यक्रमेण समिदाधानं कुर्यात् न सावित्र्या अग्न्यत्सर्वं समानं ततो याज्ञोपकल्पि
ताधानास्तिस्रस्तिस्रो गृहीत्वा ओं धानो भवन्त्विति मंत्रेण दन्तैरखादन्तः प्राश्नीयुः द्विराचम
ने ओं दधिक्राव्णो० इति मन्त्रेण दधि भक्षेयुः द्विराचमने तत आचार्यो यावच्छिष्याणां
आत्मनश्छेनावनतिला वा णायित्वा आकर्षफलकेनावदाय सक्रज्ज्योतिरित्यनुवाकेन सा
वित्र्या वा जुहुयात् ओं तत्सवितु० दयात् स्वाहा इदं सावित्रे० संस्रवप्रक्षेपः ततो याज्ञ्यमः
स्विष्टकृत् ओं अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते भूराद्यानवाहुतय आज्येन जुहुया
त् सर्वत्र याज्यान्ते द्रव्यप्रक्षेपः संस्रवप्राशनं आचमनं पवित्राभ्यां मार्जनं अग्नौ पवित्रप्रति
पत्तिः ब्रह्मणो पूर्णपात्रदानं तद्यथा ब्रह्मन्नत्रसोपाकर्मणो गत यावि दिनं पूर्णपात्रं प्रति
गृह्यते ओं द्यौस्त्वा ददातु इति मंत्रस्य ब्रह्मणो जपः प्रणीताविमोकः ततोग्निमुत्तरेण कुशेषु
प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुखः आचार्यः ओंकारमुक्त्वा त्रिः सावित्रीमनुब्रूया
त् यथा ओं तत्सवितु० दयात् इषे त्वादि ईशावास्यमन्तं व्रतस्य उपेयान्नित्यादि सर्वं मनुब्रू

CC-0 In Public Domain. Digitzed by eGangotri